[वैदिकधर्मश्रद्धालूनां पण्डितकुलभूषणानां श्रीमद्राजर्षिश्रीनिवासमहाराजसूनूनां
बी. ए. इत्युपपदधारिणां प्रतिनिधिबिरुदभाजां श्रीमतां भवानीराय
इत्यथवा बालासाहेब इत्यपराभिधानां औंधाधीशानां
महनीयनाश्रयेण]

वाजसनेयि-माध्यन्दिन-शुक्ल

यजुर्वेद-संहिता ।

स्वाध्यायमण्डलस्थानेकपण्डितानां साहाय्येन विविधप्राचीनहस्तलिखितपुस्तकपाठानुसारेण
सातवलेकरकुलजेन दामोदरभट्टसूनुना श्रीपादशर्मणा
संशोधिता ।

सा च

औन्धराजधान्यां
भारतमुद्रणालये मुद्रयित्वा स्वाध्यायमण्डलद्वारा प्रकाशिता ।

विक्रमीयसंवत् १९८४; शालीवाहनशकः १८४९

मूल्यं रूप्यक-द्वयम् ।

मुद्रक तथा प्रकाशक– श्रीपाद दामोदर सातवळेकर,
भारतमुद्रणालय, स्वाध्याय-मंडल, औंध (जि० सातारा)

अथ वेद-विषयकः

प्रस्तावः ।

तस्माद्यज्ञात्सर्वहुत ऋचः सामानि जज्ञिरे ।
छन्दाँसि जज्ञिरे तस्माद्यजुस्तस्मादजायत ॥

ऋग्वेदः १० । ९० । ९; वा० यजु० ३१ । ७

यस्मादृचो अपातक्षन्यजुर्यस्मादपाकषन् ।
सामानि यस्य लोमान्यथर्वाङ्गिरसो मुखं
स्कम्भं तं ब्रूहि कतमः स्विदेव सः ॥

अथर्व० १० । ७ । २०

अस्य महतो भूतस्य निःश्वसितमेतद्
यदृग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरसः ॥

बृ० उ० २ । ४ । १०

सनातनस्याऽस्य महतो भूतस्य निःश्वसितमेवैतदृग्वेदो यजुर्वेदः सामवेदोऽथर्ववेद इति श्रुतिस्मृति-पुराणेतिहासानां सनातन एव राद्धान्तो, निखिलैः शास्त्रदर्शिभिः स्वीकृतश्च । यथैतन्महद्भूतं सर्वत्र सर्वथा सर्वदा परिपूर्णं तथैव तस्मादेवोत्पन्नोऽयं वेदराशिः सर्वत्र सर्वथा सर्वदा परिपूर्ण एव भवितुं योग्य इति सुतरां सङ्गतमेव—

"पूर्णात्पूर्णमुदचति" ॥ अथर्व० १० । ८ । २९.

इतिन्यायात् । संभवत्येव पूर्णस्य प्रकाशः पूर्णादेव, कथं नाम स्वयं परिपूर्णमपूर्णात्प्रकाशितं भवेत् ? भवेच्चेत् कथं नाम तत्पूर्णमित्याख्यायेत । एवं सनातनमहद्भूतनिःश्वासभूतोऽयं सनातनो वेदराशिर्मानवानामार्याणां सम्मानयोग्यो धर्मग्रन्थ आब्रह्मणः कालादद्यावधि वर्णाश्रमधर्ममार्गावलम्बिभिः सर्वैरपि स्वतःप्रमाणत्वेन स्वीकृतश्च । मनुरप्याह—

वेदोऽखिलो धर्ममूलम् । मनुस्मृ० २ । ६,

इति । सोऽयं सनातनो वेदराशिर्वस्तुतः—

एक एव पुरा वेदः प्रणवः सर्ववाङ्मयः ।

श्रीमद्भागवते ९ । १४ । ४९

इत्युक्तत्वादेकः सन्नपि विज्ञान–कर्म–समुपासना–ब्रह्मसाक्षात्काररूपचतुर्विधप्रयोजनभेदेन ऋग्यजुःसामा-थर्ववेदसंहितासु चतुर्धा संविभक्तोऽपि, परापरसोपानास्थितानां धर्मनिष्ठावतां मनुष्याणामधिकारभेदतोऽवस्था-

भेददृष्ट्या तत्रतत्रानुष्ठानयोग्यकर्तव्योपदेशेन सनातनमेकमेव मानवधर्मं सर्वेभ्यो मानवेभ्यः समुपदिशति। अत एवोक्तं—

यः कश्चित्कस्यचिद्धर्मो मनुना परिकीर्तितः।
स सर्वोऽभिहितो वेदे सर्वज्ञानमयो हि सः।

मनु० २।७

इति। मानवादिवाक्यप्रतिपादितनानाविधधर्मजातबीजभूतं तत्त्वं वेद एवाभिहितमिति मुक्तवाक्यतात्पर्यम्।

तत्र ऋग्वेदस्य प्राधान्येन विज्ञानं प्रतिपाद्यं, यजुर्वेदस्य नानाविधाध्वररूपकर्माणि, साम्नामुपासनाः, आथर्वणानां च ब्रह्मात्मसाक्षात्कारः। तदिदं प्राधान्येन वेदचतुष्टयस्य विषयजातं मन्त्रेषु सुस्पष्टतयैव वेदविचारकैर्यद्यपि न ज्ञातुमशक्यं तथापि स्पष्टतायै वेदचतुष्टयस्य विषयचतुष्टयं विशदीक्रियते नातिविस्तरेण। ऋग्वेदस्य प्रयोजनं ऋग्भिरेवैवं वर्ण्यते—

इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सुपर्णो गरुत्मान्।
एकं सद्विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः॥
यस्तन्न वेद किमृचा करिष्यति य इत्तद्विदुस्त इमे समासते॥ इति

ऋग्वेद० १।१६४।३९, ४६

विशेषेण प्राज्ञा मेधाविनस्तत्त्वदर्शिनो ब्रह्मनिष्ठा नामरूपरहितमेकमपि सत्यमद्वितीयं ब्रह्माग्नीन्द्रादित्यादिविविधदेवता-नाम-भेदेन बहुधा वर्णयन्ति। तथा च-

सुपर्णं विप्राः कवयो वचोभिरेकं सन्तं बहुधा कल्पयन्ति।

ऋग्वेद० १०।११४।४

एकं सन्तमपि तं बहुधा कल्पयित्वा प्राज्ञाप्राज्ञसमवबोधाय प्रवदन्ति सन्तः। अनात्मापि तैर्बहुभिर्नामभिरुपदिश्यते,नामभेदे सत्यपि वैदिकेषु मन्त्रेषु क्वचिदपि वर्ण्यभेदो नास्त्येव। य एतदेवं न जानाति स ऋग्भिः किं करिष्यति? ये तु सुविज्ञानवन्त एतदेवं जानन्ति त एव "**सजोषा धीरा गुहा चरन्तं नमो युजानं नमो वहन्तं** ब्रह्म मन्त्राणां **पदैरनुग्मन् तदेवोपसीदन्ति**। (ऋ० १।६५।१)"

अस्यैवैकस्य सद्वस्तुनो वर्णनं ऋङ्मन्त्राणां मुख्यं प्रयोजनं, तत्तु अग्न्यादिविभिन्नदेवतास्तुतिमिषेण ऋग्वेदे सर्वत्र दृश्यते। ऋचन्ति स्तुवन्ति वर्णयन्ति वा सत्तत्त्वमिति ऋचः, स एव ऋग्वेदः। इति व्युत्पत्त्या सुस्पष्टमेवास्यर्ग्वेदस्य सत्तत्त्वविज्ञानदर्शनमेव मुख्यं प्रयोजनमिति।

सत्तत्त्वविज्ञानश्रवणात्तत्प्राप्त्युपायानुष्ठानाय चोदना भवत्येव। अनया चोदनया चोदितो मानवः, "क्रतुमयोऽयं पुरुषः" इति स्वस्य क्रतुमयत्वं मनसि निधाय, क्रतुभिरेव स्वस्योन्नयनं शक्यमिति मन्वानः, केनानुष्ठानेन तदृङ्मन्त्रप्रतिपादितं सत्तत्त्वं प्रत्यक्षीकुर्यामिति चिन्तयन्, यदा कुण्ठितगतिर्भवति तदैव यजुषामध्वरमार्गोपदेशस्याधिकारी भवति। तत्राध्वरवेदे प्रथमे यजुषि-

देवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्मण आप्यायध्वम्।

वा० यजु० १।१

इत्याप्यायनाय श्रेष्ठतममेव कर्मानुष्ठेयं नाऽन्यदिति समामननं, हीनकर्मत्यागपूर्वकं प्रशस्ततमसत्कर्मानुष्ठानमेवासंशयं चित्तशुद्धिद्वारा सद्वस्तुप्रापकं भवतीति दर्शयति। एवं सद्वस्तुप्रापकः प्रशस्ततमोऽध्वरमार्गो यजुर्भिरुपदिश्यते।

यथाऽदर्शके दर्शे षोडशिनो दर्शनेच्छायां संजातायां सत्यामपि पौर्णमास्यामेव तस्य षोडशकलानिधेः संपूर्ण संदर्शनं संभवति, तद्वदेव दर्शक्रतुमारभ्य षोडशिन आत्मनो दर्शनकामेन यजमानेन प्रशस्ततमक्रत्वारम्भे कृतेऽपि पुरुषमेध–सर्वमेध (अ० ३०, ३१, ३२) मखादीनां समाप्त्यनन्तरमेव सर्वशान्तिकरण–(अ० ३६) पूर्वकं—

ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत् । वा० यजु० अ० ४० । १

इत्यन्तिमेनाध्यायेन षोडशिन आत्मनः सर्वत्र दर्शनं कर्तुं शक्यम् । एतदेव यथाक्रमोन्नति–सोपान-परम्परया यजुर्भिः प्रदर्श्यते, यथा—

वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात् ।
तमेव विदित्वाऽतिमृत्युमेति नाऽन्यः पन्था विद्यतेऽयनाय ॥

वा० यजु० ३१ । १८

न तस्य प्रतिमा अस्ति यस्य नाम महद्यशः । वा० य० ३२ । ३

इत्यादि-पुरुषमेध-सर्वमेधादि-महामखप्रतिपादकैर्मन्त्रैस्तस्यैव सद्वस्तुनो ब्रह्मणःप्रशंसनमयं वर्णनमस्याध्वरवेदस्यापि तदेव साध्यमिति निष्ठां द्रढयति । एतदेव साध्यं यजुषामध्वरवेदेनान्तिमेनाध्यायेन ईशावास्यादिना साध्यते । एषा दर्शयज्ञ (अ० १)मारभ्य ब्रह्मयज्ञ (अ० ४०) पर्यन्तं क्रतुसङ्गतिरित्यवबुध्य, यजुषां प्रशस्ततमकर्मदर्शनमेव प्रयोजनं चित्तशुद्धिद्वारा सद्वस्तुप्रापणायालं भवतीति ज्ञेयम् ।

"**यर्क् तत्साम ।**" (छां० उ० १ । ३ । ४) इति छान्दोग्योपनिषदुपदेशे या ऋक् तदेव सामेति प्रतिपादनेन ऋचां साम्नां चाऽभेदः साध्यस्य किल प्रदर्शितः । यत्तु ऋग्भिः स्तूयते प्रशस्यते वर्ण्यते वा, तदेव सामभिर्गीयते समुपास्यते निदिध्यास्यते वेति, सामवेदस्य सत्तत्त्वोपासनारूपत्वं स्फुटतरं भवति ।

अथाथर्ववेदस्य ब्रह्मभूतानां मन्त्राणां प्रयोजनमात्मनि ब्रह्मसाक्षात्कारस्तत्तु तेष्वेव मन्त्रेषु दृश्यताम् ।–

ये पुरुषे ब्रह्म विदुस्ते विदुः परमेष्ठिनम् ।

अथर्व० १० । ७ । १७

एको ह देवो मनसि प्रविष्टः ॥ अथर्व० १० । ८ । २८

अष्टाचक्रा नवद्वारा देवानां पूरयोध्या ।
तस्यां हिरण्ययः कोशः स्वर्गो ज्योतिषावृतः ॥
तस्मिन्हिरण्यये कोशे त्र्यरे त्रिप्रतिष्ठिते ।
तस्मिन्यद्यक्षमात्मन्वत्तद्वै ब्रह्मविदो विदुः ॥

अथर्व० १० । २ । ३१, ३२

पुण्डरीकं नवद्वारं त्रिभिर्गुणेभिरावृतम् ।
तस्मिन्यद्यक्षमात्मन्वत्तद्वै ब्रह्मविदो विदुः ॥ अथर्व० १० । ८ । ४३

इत्येवं विविधैर्मन्त्रैः स्वस्यैव हृदयपुण्डरीके ब्रह्मसाक्षात्कारकरणं लक्ष्यमथर्ववेदस्येति सिद्धमेव, नैतत्प्रमाणान्तरमपेक्षते ।

एवं प्रयोजनभेदेन चतुर्धा संविभक्तस्यापि वेदस्यात्मनि ब्रह्मानुभूतिरेव नितरां सन्धानमिति–

वेदैश्च सर्वैरहमेव वेद्यः ॥ भ० गी० १५ । १५

अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः । भ० गी० १५ । १८

इत्यादिपुण्यवचनैः श्रीमता भगवतैव स्वयमर्जुनोपदेशमिषेण प्रदर्शितं किल सर्वेषां वेदानां तदेकमेव लक्ष्यमिति । एवमेकस्यापि चतुर्धा विभक्तस्य वेदस्य पुनरनेकधैव शाखाभेदोऽपि दृश्यते, यथा–

एकविंशत्यध्वयुक्तमृग्वेदमृषयो विदुः ।
सहस्राध्वा सामवेदो यजुरेकशताध्वकम् ॥
नवाध्वाऽऽथर्वणोऽन्ये तु प्राहुः पञ्चाशदध्वकम् ॥

इति षड्गुरुशिष्यः सर्वानुक्रमणीवृत्तौ कथयामास । तथा च-

एकविंशतिभेदेन ऋग्वेदं कृतवान्पुरा ।
शाखानां तु शतेनाथ यजुर्वेदमथाकरात् ॥
सामवेदं सहस्रेण शाखानां च विभेदतः ।
आथर्वणमथो वेदं बिभेद नवकेन तु ॥ कूर्मपुराणे ४९ । ५१—५२.

एवमनेकविधे शाखाविस्तारे सत्यपि चतसृणामेव संहितानां क्वचित्पाठभेदेन, क्वचिदानुपूर्वीभेदेन क्वचिदन्यैर्वा कैश्चिद्भेदैः सर्वासु शाखासूपस्थितत्वाच्चतसृणामासां संहितानां वेदराशित्वमित्युच्यते वैदिकैर्न च तत्केनाप्यद्यावध्यवधीरितमतस्तदेव वयमत्र प्रमाणीकुर्मः ।

एष वेदो ब्राह्मणेनाध्येतव्यो द्विजैर्वाऽवश्यं पठितव्यश्च । अनधीयानो विप्रो द्विजत्वाद्धीयत इति स्मार्तसिद्धान्तमुररीकृत्य द्विजानां स्वाध्यायसौकर्यसाधननिर्माणाय स्वाध्यायमण्डलं नाम विद्वत्परिषद्रूपं पूर्वमेकादशवर्षेभ्य औन्धनगरे स्थापितम् । वैदिकधर्मस्य पुनरुज्ज्वलीकरणमेव स्वाध्यायमण्डलस्य लक्ष्यम् । तत्सिद्ध्यर्थं चतुर्णामपि वेदानामशुद्ध्यादिदोषरहितं मुद्रणं परमावश्यकमिति निश्चितमेव । अद्यावधि वेदसंहितानां बहवो ग्रन्था भारते वर्षे यूरोपीयदेशे च मुद्रिताः सन्ति । भारतवर्षमुद्रितवैदिकग्रन्थापेक्षया यूरोपीयदेशमुद्रिता ग्रन्था न्यूनमुद्रणादिदोषा इत्येतद्यथा तेषां प्रशंसावहं भवति, तथैवास्माकं वैगुण्यमपि प्रकाशयति । यूरोपीयदेशमुद्रितानां पुस्तकानां बहुमूल्यत्वात्ते ग्रन्था अस्मद्देशीयानामुपकाराय न भवन्तीति कृत्वा वेदसंहितानां मुद्रणं अत्रैव कर्तव्यमिति बहोः कालान्मनीषितमासीत् । अद्यावधि मुद्रिता ग्रन्था मुद्रणादिदोषयुक्ताः सन्तीत्यतो दोषराहित्याय विशेषं विमृश्यैवैते ग्रन्था मुद्रणीया इत्यत्र न कापि विप्रतिपत्तिर्भवितुमर्हति ।

चतसृणां संहितानां समुपलब्धशाखासंहितानां च स्वाध्यायसौकर्यदृष्ट्याऽशुद्ध्यादिदोषरहितं यावच्छक्यं तावन्मुद्रणं कार्यमिति स्वाध्यायमण्डलस्थैः कर्मचारिभिः पूर्वमेव निर्धारितम् । कर्मैतत्तु विशेषेण धनापेक्षि वर्तत इति मत्वैतः पूर्वं मुद्रणं न प्रारब्धम् ।

एतस्मिन्नेव समये श्रीमद्भिः पण्डितप्रतिनिधिकुलभूषणैः श्रीभवानीरायभूपैरौन्धनरेशैः पञ्चसहस्ररौप्यमुद्रादानं केवलं वेदमुद्रणार्थमेव स्वाध्यायमण्डलाय कृतम्, येन धनेन वाजसनेयिमाध्यन्दिनशुक्लयजुर्वेदसंहिताया मुद्रणं कृतम् । अत ऊर्ध्वं अथर्ववेदसंहिताया मुद्रणं भविष्यति, तदनन्तरं च ऋग्वेदसंहितायाः ।

यजुर्वेदस्य शाखाभेदविषयेऽपि किञ्चिदत्रोल्लेखनीयम् । "यजुरेकशताध्वकं" इत्युक्तरीत्याऽस्यैकशतं शाखा आसन्निति निश्चीयते । परन्तु चरणव्यूहे षडशीतिसंख्यात्वेनैव तासां परिगणनं कृतम्—

यजुर्वेदस्य षडशीतिर्भेदा भवन्ति । तत्र—

"(१) चरका नाम द्वादश भेदा भवन्ति = चरकाः, आह्वरकाः, कठाः, प्राच्यकठाः, कपिष्ठलकठाः, चारायणीयाः, वारायणीयाः, वार्तान्तवेयाः, श्वेताश्वतराः, औपमन्यवः, पातण्डिनीयाः, मैत्रायणीयाश्चेति ॥ (१२)

"तत्र मैत्रायणीया नाम सप्त भेदा भवन्ति = मानवाः, दुन्दुभाः, चैकेयाः, वाराहाः, हारिद्रवेयाः, श्यामाः, श्यामायनीयाश्चेति ॥ (७)

"(२) वाजसनेया नाम सप्तदश भेदा भवन्ति=जाबालाः, बौधेयाः,
काण्वाः, माध्यन्दिनाः, शापीयाः, तापायनीयाः, कापालाः,
पौण्ड्रवत्साः, आवटिकाः, परमावटिकाः, पाराशरीयाः,
वैधेयाः, वैनेयाः, औधेयाः, गालवाः, बैजवाः, कात्यायनीयाश्चेति॥ (१७)

"(३) तैत्तिरीयका नाम द्विभेदा भवन्ति = औख्याः, खाण्डिकेयाश्चेति ।
तत्र खाण्डिकेया नाम पञ्च भेदा भवन्ति—आपस्तम्बाः,
बौधायनाः, सत्याषाढाः, हैरण्यकेशाः, काठ्यायनाश्चेति ॥ (६)
"तत्र कठानां......चतुश्चत्वारिंशदुपग्रन्थाः ॥" (४४)

चरणव्यूहे २

व्याकरणमहाभाष्ये पस्पशाह्निके भगवता पतञ्जलिना कथितमस्ति यजुर्वेदस्यैकशतं भेदास्तदेव कूर्मपुराणादिषु दृश्यते । परन्तु चरणव्यूहरचनासमये केवलं तेषां षडशीतिभेदा एवावशिष्टाः स्युः । अथवा कठानामुपग्रन्थनामलेखनाभावात्तेषां शाखापरिगणने गणनमपि कर्तुं न योग्यं, येन केवलं द्विचत्वारिंशदेव शाखास्तस्मिन्काल आसन्निति वक्तुं समीचीनम् । अन्य एकोनषष्टिशाखाभेदाश्चरणव्यूहरचनासमयात्पूर्वमेव प्रनष्टाः ।

तास्वपि द्विचत्वारिंशच्छाखासु केवलमिदानीं पञ्चैव शाखासंहिताग्रन्था उपलभ्यन्तेऽन्ये सप्तत्रिंशद्ग्रन्था लुप्तप्राया एव । उपलब्धयजुःसंहितानां नामानि काठकसंहिता, मैत्रायणीसंहिता, काण्वसंहिता, वाजसनेयिसंहिता, तैत्तिरीयसंहितेति । तत्रेदं वाजसनेयिसंहिताया मुद्रणं कृतम् । अन्यासां मुद्रणं क्रमशो भविष्यति ।

वाजसनेयिसंहिताया अद्यावधि कतिपयानि पुस्तकानि मुद्रितानि सन्ति, तेषु कति पत्रात्मकानि, कति च पुस्तकरूपाणि; कति संपूर्णस्वरचिन्हयुतानि, कति च केवलमुदात्तादिस्वरचिन्हयुतानि सन्ति । परन्तु सर्वेष्वपि तेषु पुस्तकेषु बहूनि प्रमादस्खलितानि दृश्यन्ते,अतस्तेषां दोषस्थानप्रमाणन्यूनाधिकतया स्वाध्यायोपयोगित्वं न्यूनाधिकतरं भवति । अद्यावधि मुद्रितपुस्तकेषु प्रधानान्येतानि परिगणनीयानि–

(क) पं० वेबरमहोदयेन शार्मण्यदेशे मुद्रितं महीधरभाष्ययुक्तं वाजसनेयिसंहितापुस्तकं मन्त्रपाठनिश्चयकरणे कृतबहुपरिश्रमत्वात्सर्वेषु मुद्रितपुस्तकेषु प्रधानं स्थानमर्हति । [एतत्त्विदानीं नोपलभ्यते । अस्माभिस्तु पञ्चाब्देशीयलवपुरीयाद् वैदिकपुस्तकालयाच्छ्रीमत्या आर्यप्रतिनिधिसभायाः कृपाप्रसादेन प्राप्तम् । तदर्थं श्रीमत्यै सभायै धन्यवादान्वितरामः ।]

(ख) मुम्बय्यां निर्णयसागरयन्त्रालये मुद्रितं भाष्यद्वययुतं वाजसनेयिसंहितापुस्तकं विद्वद्भिः श्रीमन्निर्वासुदेवपणशीकरशास्त्रिभिः संशोधितं तदूर्ध्वं गणनायोग्यमस्ति ।

(ग) मुम्बय्यामेव व्यङ्कटेश्वरयन्त्रालये मुद्रितानि कतिपयानि वाजसनेयिसंहितापुस्तकानि पत्रात्मकानि पुस्तकरूपाणि मूलमात्राणि भाषाटीकासहितानि च सन्ति ।

(घ) अजमेरनगरीये वैदिकयन्त्रालये मुद्रितं मूलमात्रं वाजसनेयिसंहितापुस्तकम् । श्रीमद्दयानन्दभाष्ययुक्तमपि तत्रैव मुद्रितं, पाठाय योग्यमस्ति ।

(ङ) कलिकातानगरे मुद्रितानि कतिपयानि पुस्तकान्यत ऊर्ध्वं गणनीयानि सन्ति ।

एतेषूपरि निर्दिष्टेषु पुस्तकेषु यथाक्रममेव पूर्वस्मादुत्तरस्मिन्नधिकान्यधिकानि स्खलितानि सन्ति । शार्मण्यदेशमुद्रितमेव पुस्तकं सर्वेषु न्यूनस्खलनयुक्तं वर्तते । तथाप्येतत्कण्डिकारूपेण मन्त्रान्संविभज्य मुद्रितत्वान्न नित्यपाठायोपयोगीति निश्चितमेव ।

नित्यपाठाय स्खलनादिदोषरहितमेव पुस्तकमावश्यकमिति मत्वाऽस्माभिर्यावच्छक्यं तावन्निर्दोषमुद्रणायैवैष

यत्नः कृतः। तथापि न कथ्यतेऽत्रैकमपि स्खलनं नास्तीति, परन्तूपलब्धमुद्रितपुस्तकापेक्षयात्रातिन्यूनस्खलनानि भवेयुरिति निश्चयोऽस्ति। यावच्छक्यं तावदस्माभिर्निर्दोषमुद्रणाय महान्प्रयत्नः कृतः। प्रथमं तावत्प्राचीन-हस्तलिखितविविधपुस्तकानि समवलोक्य मन्त्रपाठनिश्चयः कृतः। एतदर्थं काशी-जनस्थान-त्र्यम्बकेश्वर-ग्वालेरा-हमदनगरादिनानानगरेभ्यो वैदिकब्राह्मणेभ्यो हस्तलिखितानि बहूनि पुस्तकान्यानीय तेषां पाठतुलनया यथायोग्यमालोडनं कृतम्। अनयैव तुलनया मुद्रितपुस्तकानां बहूनि दोषस्थलानि स्वयमेव व्यक्तीभूतानि। प्रायशो यथा व्रणिनां रोगिणां वाऽङ्गसंशोधनं वैद्यैः क्रियते, तथैव वैदिकैर्वेदपुस्तकानां संशोधनं क्रियते। अतो येषां कुले परम्परया वेदाध्ययनं भवति, तेषां वेदपुस्तकानि पाठनिश्चयाय सुनिश्चयेन प्रामाणिकानि भवन्ति। एतदेवास्माभिः प्रत्यक्षीकृतमस्यां मन्त्रपाठतुलनायाम्। अत्रानीतेषु हस्तलिखितग्रन्थेषु कतिपये ग्रन्था अत्यन्तमेवाशुद्ध्यादिदोषरहिता आसन्, तेषां चालोकनेन मन्त्रपाठनिश्चयकरणमतीव सुकरं जातमिति सानन्दं तेषां प्रशंसनमत्र क्रियते। विशेषतस्त्वहमदनगरीयवैदिकधर्मसभाया मन्त्रिमहोदयैर्महादेवदामोदरसुवर्णपाटकीभिः कतिपयानि बहुमूल्यानि पुस्तकानि संप्रेष्य स्वाध्यायमण्डलस्यैतत्संशोधनकर्मातीव सुकरं कृतमिति तेऽवश्यं धन्यवादार्हाः।

यत्रयत्र पुस्तकेषु मुद्रितेष्वमुद्रितेषु वा परस्परविरोधकपाठदर्शनात्किञ्चिदपि शङ्कास्थानं समुत्पन्नं तत्र तत्र घनान्तवेदपाठिनां वैदिकानां साहाय्येन पाठनिश्चयः कृतः। एवंरीत्या यथा दोषन्यूनता भवेत्तथैवात्र यत्नो विहितः। एष एवास्य पुस्तकस्य विशेषः। अस्य कृते औंध-जनस्थान-ग्वालेर-देशीयानां निपुणघनपाठिनां वैदिकानां ब्राह्मणानां विशेषेणैव साहाय्यमभूदतस्ते सर्वेऽपि धन्यवादार्हाः। अत्रत्यानां साहाय्यकर्तॄणां मध्ये देवधरकुलोत्पन्ना रघुनाथसूनवो दत्तात्रेयशास्त्रिणः पदपाठतुलनाकरणाय दोषस्थलदूरीकरणाय चाऽतीव सहायका अभवन्निति तेऽप्यत्र धन्यवादार्हाः।

मुद्रणेऽपि मन्त्राः परस्परमसंश्लिष्टा असङ्कीर्णा वा यथा भवेयुस्तथैव पृथक्पृथगेव मुद्रितास्तेन नित्यपाठायैतत्पुस्तकमत्यन्तमुपयोगि भविष्यतीति निश्चय एवास्ति।

शुक्लेषु यजुःषु वाजसनेयिनां संहिता काण्वानां संहितानुसारिणी एवाऽस्ति। अतो॰ वाजसनेयिसंहिताध्ययनावसरे काण्वसंहितापाठविशेषदर्शनमावश्यकमेवेति मत्वा, ते सर्वेऽपि पाठविशेषा अत्र विस्तरशो दत्ताः। तत्र कोष्ठद्वये क्रमेणोभयोः पार्श्वयोर्वाजसनेयिसंहितामन्त्राङ्काः काण्वसंहितामन्त्राङ्काश्च दर्शिताः। तेनैकस्याः संहिताया मन्त्रा अन्यस्यां संहितायां कुत्र वर्तन्त इति स्पष्टमसङ्कीर्णतया ज्ञास्यते। एषोऽपि पुस्तकस्याऽस्य विशेषोऽस्ति।

तदूर्ध्वमध्यायक्रमेणाकारादिवर्णानुक्रमक्रमेण च ऋषिदेवतासूच्यो दत्तास्ताः स्वाध्यायार्थमतीव साहाय्यकारिण्यो भविष्यन्तीति निश्चयोऽस्त्येव।

अस्य पुस्तकस्योत्तरस्मिन् विभागे मन्त्राणां पादसूचिस्तथा सर्वानुक्रमसूत्रादिकं मुद्रितं भविष्यति। मन्त्राणां पादसूचिस्तु न कुत्राप्यद्यावधि मुद्रिता। अत आशास्यते सर्वमेवैतद्बहूपयोगि भविष्यति स्वाध्यायशीलेभ्यो वैदिकधर्माबलम्बिभ्य इति।

यस्य निःश्वसितमेतत्तस्यैव परमात्मनोऽनुग्रहेणैतत्संशोधनमुद्रणादिकं कार्यं प्रारब्धं तस्यैव कृपयैतत्समाप्तिमगमत्। अतस्तमेव प्रणतिसहस्रपुरःसरं मनसाऽभ्यर्च्येदानीं विरम्यते

औन्ध नगरे।	सान्तवलेकरोपाह्वेन दामोदरसूनुना श्रीपाददशर्मणा।
पौष शु. १५ विक्रमीयसंवत्। १९८४	स्वाध्यायमण्डले

ॐ

वाजसनेयि-माध्यन्दिन-शुक्ल

यजुर्वेदसंहिता ।

अथ प्रथमोऽध्यायः ।

॥ ओ३म् ॥ इषे त्वोर्जे त्वा वायवं स्थ देवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्मणऽ
आप्यायध्वमघ्न्याऽइन्द्राय भागं प्रजावतीरनमीवाऽअयक्ष्मा मा वं स्तेनऽईशत माघ-
शंꣳसो ध्रुवाऽअस्मिन् गोपतौ स्यात बह्वीर्यजमानस्य पशून्पाहि ॥ १ ॥

वसोः पवित्रमसि द्यौरसि पृथिव्यासि मातरिश्वनो घर्मोऽसि विश्वधाऽअसि ।
परमेण धाम्ना दृꣳहस्व मा ह्वार्मा ते यज्ञपतिर्ह्वार्षीत् ॥ २ ॥

वसोः पवित्रमसि शतधारं वसोः पवित्रमसि सहस्रधारम् ।
देवस्त्वा सविता पुनातु वसोः पवित्रेण शतधारेण सुप्वा कामधुक्षः ॥ ३ ॥

सा विश्वायुः सा विश्वकर्मा सा विश्वधायाः ।
इन्द्रस्य त्वा भागꣳ सोमेनातनच्मि विष्णो हव्यꣳ रक्ष ॥ ४ ॥

अग्ने व्रतपते व्रतं चरिष्यामि तच्छकेयं तन्मे राध्यताम्। इदमहमनृतात्सत्यमुपैमि ॥ ५ ॥

कस्त्वा युनक्ति स त्वा युनक्ति कस्मै त्वा युनक्ति तस्मै त्वा युनक्ति ।
कर्मणे वां वेषाय वाम् ॥ ६ ॥

प्रत्युष्टꣳ रक्षः प्रत्युष्टाऽअरातयो निष्टप्तꣳ रक्षो निष्टप्ताऽअरातयः ।
उर्वन्तरिक्षमन्वेमि ॥ ७ ॥

धूरसि धूर्व धूर्वन्तं धूर्व तं योऽस्मान्धूर्वति तं धूर्व यं वयं धूर्वामः ।
देवानामसि वह्नितमꣳ सस्नितमं पप्रितमं जुष्टतमं देवहूतमम् ॥ ८ ॥

अह्रुतमसि हविर्धानं दृꣳहस्व मा ह्वार्मा ते यज्ञपतिर्ह्वार्षीत् ।
विष्णुस्त्वा क्रमतामुरु वातायापहतꣳ रक्षो यच्छन्तां पञ्च ॥ ९ ॥

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् ।
अग्नये जुष्टं गृह्णाम्यग्नीषोमाभ्यां जुष्टं गृह्णामि ॥ १० ॥

भूताय त्वा नारातये स्वरभिविख्येषं दृꣳहन्तां दुर्याः पृथिव्यामुर्वन्तरिक्षमन्वेमि ।
पृथिव्यास्त्वा नाभौ सादयाम्यदित्या ऽ उपस्थेऽग्ने हव्यꣳ रक्ष ॥ ११ ॥

पवित्रे स्थो वैष्णव्यौ सवितुर्वः प्रसव उत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः । देवीरापोऽअग्रेगुवोऽअग्रेपुवोऽग्रऽइममद्य यज्ञं नयताग्रे यज्ञपतिꣳ सुधातुं यज्ञपतिं देवयुवम्॥१२

युष्मा ऽइन्द्रोऽवृणीत वृत्रतूर्ये यूयमिन्द्रमवृणीध्वं वृत्रतूर्ये प्रोक्षिता स्थ । अग्नये त्वा जुष्टं प्रोक्षाम्यग्नीषोमाभ्यां त्वा जुष्टं प्रोक्षामि । दैव्याय कर्मणे शुन्धध्वं देवयज्यायै यद्वोऽशुद्धाः पराजघ्नुरिदं वस्तच्छुन्धामि ॥ १३ ॥

शर्मास्यवधूतꣳ रक्षोऽवधूता ऽ अरातयोऽदित्यास्त्वगसि प्रति त्वादितिर्वेत्तु ।
अद्रिरसि वानस्पत्यो ग्रावासि पृथुबुध्नः प्रति त्वादित्यास्त्वग्वेत्तु ॥ १४ ॥

अग्नेस्तनूरसि वाचो विसर्जनं देववीतये त्वा गृह्णामि बृहद्ग्रावासि वानस्पत्यः स ऽ इदं देवेभ्यो हविः शमीष्व सुशमि शमीष्व । हविष्कृदेहि हविष्कृदेहि ॥ १५ ॥

कुक्कुटोऽसि मधुजिह्वऽइषमूर्जमावद त्वया वयꣳ सङ्घातꣳ सङ्घातं जेष्म वर्षवृद्धमसि प्रति त्वा वर्षवृद्धं वेत्तु परापूतꣳ रक्षः परापूता अरातयो ऽ पहतꣳ रक्षो वायुर्वो विविनक्तु देवो वः सविता हिरण्यपाणिः प्रतिगृभ्णात्वच्छिद्रेण पाणिना ॥ १६ ॥

धृष्टिरस्यपाऽग्ने ऽ अग्निमामादं जहि निष्क्रव्यादꣳ सेधा देवयजं वह । ध्रुवमसि पृथिवीं दृꣳह ब्रह्मवनि त्वा क्षत्रवनि सजातवन्युपदधामि भ्रातृव्यस्य वधाय १७॥

अग्ने ब्रह्म गृभ्णीष्व धरुणमस्यन्तरिक्षं दृꣳह ब्रह्मवनि त्वा क्षत्रवनि सजातवन्युपदधामि भ्रातृव्यस्य वधाय । धर्त्रमसि दिवं दृꣳह ब्रह्मवनि त्वा क्षत्रवनि सजातवन्युपदधामि भ्रातृव्यस्य वधाय । विश्वाभ्यस्त्वाशाभ्यऽउपदधामि चित स्थोर्ध्वचितो भृगूणामङ्गिरसां तपसा तप्यध्वम् ॥ १८ ॥

शर्मास्यवधूतꣳ रक्षोऽवधूता ऽ अरातयोऽदित्यास्त्वगसि प्रति त्वादितिर्वेत्तु ।

धिषणासि पर्वती प्रति त्वादित्यास्त्वग्वेत्तु दिवः स्कम्भनीरसि धिषणासि पार्वतेयी प्रति त्वा पर्वती वेत्तु ॥ १९ ॥

धान्यमसि धिनुहि देवान् प्राणाय त्वोदानाय त्वा व्यानाय त्वा । दीर्घामनु प्रसितिमायुषे धां देवो वः सविता हिरण्यपाणिः प्रति-गृभ्णात्वच्छिद्रेण पाणिना चक्षुषे त्वा महीनां पयोऽसि ॥ २० ॥

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् । सं वपामि समापऽओषधीभिः समोषधयो रसेन । सꣳ रेवतीर्जगतीभिः पृच्यन्ताꣳ सं मधुमतीर्मधुमतीभिः पृच्यन्ताम् ॥ २१ ॥

जनयत्यै त्वा संयौमीदमग्नेरिदमग्नीषोमयोरिषे त्वा घर्मोऽसि विश्वायुरुरु-प्रथाऽउरु प्रथस्वोरु ते यज्ञपतिः प्रथतामग्निष्टे त्वचं मा हिꣳसीद्देवस्त्वा सविता श्रपयतु वर्षिष्ठेऽधि नाके ॥ २२ ॥

मा भेर्मा संविक्थाऽअतमेरुर्यज्ञोऽतमेरुर्यजमानस्य प्रजा भूयात् त्रिताय त्वा द्विताय त्वैकताय त्वा ॥ २३ ॥

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् । आददेऽध्वरकृतं देवेभ्यऽइन्द्रस्य बाहुरसि दक्षिणः सहस्रभृष्टिः शततेजा वायुरसि तिग्मतेजा द्विषतो वधः ॥ २४ ॥

पृथिवि देवयजन्योषध्यास्ते मूलं मा हिꣳसिषं व्रजं गच्छ गोष्ठानं वर्षतु ते द्यौ-र्बधान देव सवितः परमस्यां पृथिव्याꣳ शतेन पाशैर्योऽस्मान्द्वेष्टि यं च वयं द्विष्मस्तमतो मा मौक् ॥ २५ ॥

अपाररुं पृथिव्यै देवयजनाद्वध्यासं व्रजं गच्छ गोष्ठानं वर्षतु ते द्यौर्बधान देव सवितः परमस्यां पृथिव्याꣳ शतेन पाशैर्योऽस्मान्द्वेष्टि यं च वयं द्विष्मस्तमतो मा मौक् । अररो दिवं मा पप्तो द्रप्सस्ते द्यां मा स्कन् व्रजं गच्छ गोष्ठानं वर्षतु ते द्यौर्बधान देव सवितः परमस्यां पृथिव्याꣳ शतेन पाशैर्योऽस्मान्द्वेष्टि यं च वयं द्विष्मस्तमतो मा मौक् ॥ २६ ॥

गायत्रेण त्वा छन्दसा परिगृह्णामि त्रैष्टुभेन त्वा छन्दसा परिगृह्णामि जागतेन

त्वा छन्दसा परिगृह्णामि । सुक्ष्मा चासि शिवा चासि स्योना चासि सुषदा चास्यूर्जस्वती चासि पयस्वती च ॥ २७ ॥

पुरा क्रूरस्य विसृपो विरप्शिन्नुदादाय पृथिवीं जीवदानुम् । यामैरयँश्चन्द्रमसि स्वधाभिस्तामु धीरासो ऽ अनुदिश्य यजन्ते । प्रोक्षणीरासादय द्विषतो बधोऽसि ॥ २८ ॥

प्रत्युष्टꣳ रक्षः प्रत्युष्टा ऽ अरातयो निष्टप्तꣳ रक्षो निष्टप्ता ऽ अरातयः ।
अनिशितोऽसि सपत्नक्षिद्वाजिनं त्वा वाजेध्यायै सम्मार्ज्मि ।
प्रत्युष्टꣳ रक्षः प्रत्युष्टा ऽ अरातयो निष्टप्तꣳ रक्षो निष्टप्ता ऽ अरातयः ।
अनिशिताऽसि सपत्नक्षिद्वाजिनीं त्वा वाजेध्यायै सम्मार्ज्मि ॥ २९ ॥

अदित्यै रास्नासि विष्णोर्वेष्योऽस्यूर्जे त्वाऽदब्धेन त्वा चक्षुषावपश्यामि ।
अग्नेर्जिह्वासि सुहूर्देवेभ्यो धाम्ने धाम्ने मे भव यजुषे यजुषे ॥ ३० ॥

सवितुस्त्वा प्रसव ऽ उत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः ।
सवितुर्वः प्रसव ऽ उत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः ।
तेजोऽसि शुक्रमस्यमृतमसि धाम नामासि प्रियं देवानामनाधृष्टं देवयजनमसि ॥३१॥

इति प्रथमोऽध्यायः ।

अथ द्वितीयोऽध्यायः ।

कृष्णोऽस्याखरेष्ठोऽग्नये त्वा जुष्टं प्रोक्षामि वेदिरसि बर्हिषे त्वा जुष्टां प्रोक्षामि बर्हिरसि स्रुग्भ्यस्त्वा जुष्टं प्रोक्षामि ॥ १ ॥

अदित्यै व्युन्दनमसि विष्णो स्तुपोऽस्यूर्णम्रदसं त्वा स्तृणामि स्वासस्थां देवेभ्यो भुवपतये स्वाहा भुवनपतये स्वाहा भूतानां पतये स्वाहा ॥ २ ॥

गन्धर्वस्त्वा विश्वावसुः परिदधातु विश्वस्यारिष्ट्यै यजमानस्य परिधिरस्यग्निरिड ऽ ईडितः । इन्द्रस्य बाहुरसि दक्षिणो विश्वस्यारिष्ट्यै यजमानस्य परिधिरस्यग्निरिड ऽ ईडितः । मित्रावरुणौ त्वोत्तरतः परिधत्तां ध्रुवेण धर्मणा विश्वस्यारिष्ट्यै यजमानस्य परिधिरस्यग्निरिड ऽ ईडितः ॥ ३ ॥

वीतिहोत्रं त्वा कवे द्युमन्तꣳसमिधीमहि । अग्ने बृहन्तमध्वरे ॥ ४ ॥

समिदसि सूर्यस्त्वा पुरस्तात् पातु कस्याश्चिदभिशस्त्यै । सवितुर्बाहू स्थ ऽ ऊर्णम्रदसं त्वा स्तृणामि स्वासस्थं देवेभ्य ऽ आ त्वा वसवो रुद्रा ऽ आदित्याः सदन्तु ॥ ५ ॥

घृताच्यसि जुहूर्नाम्ना सेदं प्रियेण धाम्ना प्रियꣳ सद ऽ आसीद घृताच्यस्युपभृन्नाम्ना सेदं प्रियेण धाम्ना प्रियꣳ सद ऽ आसीद घृताच्यसि ध्रुवा नाम्ना सेदं प्रियेण धाम्ना प्रियꣳ सद ऽ आसीद प्रियेण धाम्ना प्रियꣳ सद ऽ आसीद । ध्रुवा ऽ असदन्नृतस्य योनौ ता विष्णो पाहि पाहि यज्ञं पाहि यज्ञपतिं पाहि मां यज्ञन्यम् ॥ ६ ॥

अग्ने वाजजिद्वाजं त्वा सरिष्यन्तं वाजजितꣳ सम्मार्ज्मि ।
नमो देवेभ्यः स्वधा पितृभ्यः सुयमे मे भूयास्तम् ॥ ७ ॥

अस्कन्नमद्य देवेभ्य ऽ आज्यꣳ संभ्रियासमङ्घ्रिणा विष्णो मा त्वावक्रमिषं वसुमतीमग्ने ते च्छायामुपस्थेषं विष्णो स्थानमसीत ऽ इन्द्रो वीर्यमकृणोदूर्ध्वोऽध्वर ऽ आस्थात् ॥ ८ ॥

अग्ने वेर्होत्रं वेर्दूत्यमवतां त्वां द्यावापृथिवी ऽ अव त्वं द्यावापृथिवी स्विष्टकृद्देवेभ्य ऽ इन्द्र ऽ आज्येन हविषा भूत्स्वाहा सं ज्योतिषा ज्योतिः ॥ ९ ॥

मयीदमिन्द्र ऽ इन्द्रियं दधात्वस्मान् रायो मघवानः सचन्ताम् । अस्माकꣳ सन्त्वाशिषः सत्या नः सन्त्वाशिष ऽ उपहूता पृथिवी मातोप मां पृथिवी माता ह्वयतामग्निराग्नीध्रात्स्वाहा ॥ १० ॥

उपहूतो द्यौष्पितोप मां द्यौष्पिता ह्वयतामग्निराग्नीध्रात्स्वाहा । देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् । प्रतिगृह्णाम्यग्नेष्ट्वास्येन प्राश्नामि ॥ ११ ॥

एतं ते देव सवितर्यज्ञं प्राहुर्बृहस्पतये ब्रह्मणे ।
तेन यज्ञमव तेन यज्ञपतिं तेन मामव ॥ १२ ॥

मनो जूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमं तनोत्वरिष्टं यज्ञꣳ समिमं दधातु ।
विश्वे देवास ऽ इह मादयन्तामो३म्प्रतिष्ठ ॥ १३ ॥

एषा तेऽअग्ने समित्तया वर्धस्व चा च प्यायस्व । वर्धिषीमहि च वयमा च प्यासिषीमहि । अग्ने वाजजिद्वाजं त्वा ससृवाꣳसं वाजजितꣳ सम्मार्ज्मि ॥ १४ ॥

अग्नीषोमयोरुज्जितिमनूज्जेषं वाजस्य मा प्रसवेन प्रोहामि । अग्नीषोमौ तमपनुदतां योऽस्मान्द्वेष्टि यं च वयं द्विष्मो वाजस्यैनं प्रसवेनापोहामि। इन्द्राग्न्योरुज्जितिमनूज्जेषं वाजस्य मा प्रसवेन प्रोहामि । इन्द्राग्नी तमपनुदतां योऽस्मान् द्वेष्टि यं च वयं द्विष्मो वाजस्यैनं प्रसवेनापोहामि ॥ १५ ॥

वसुभ्यस्त्वा रुद्रेभ्यस्त्वादित्येभ्यस्त्वा संजानाथां द्यावापृथिवी मित्रावरुणौ त्वा वृष्ट्यावताम् । व्यन्तु वयोक्तꣳ रिहाणा मरुतां पृषतीर्गच्छ वशा पृश्निर्भूत्वा दिवं गच्छ ततो नो वृष्टिमावह । चक्षुष्पाऽअग्नेऽसि चक्षुर्मे पाहि ॥ १६ ॥

यं परिधिं पर्यधत्थाऽअग्ने देव पणिभिर्गुह्यमानः । तं तऽएतमनु जोषं भराम्येष नेत्त्वदपचेतयाताऽअग्नेः प्रियं पाथोऽपीतम् ॥ १७ ॥

सꣳस्रवभागा स्थेषा बृहन्तः प्रस्तरेष्ठाः परिधेयाश्च देवाः । इमां वाचमभि विश्वे गृणन्तऽआसद्यास्मिन् बर्हिषि मादयध्वꣳ स्वाहा वाट् ॥ १८ ॥

घृताची स्थो धुर्यौ पातꣳ सुम्ने स्थः सुम्ने मा धत्तम् ।
यज्ञ नमश्च तऽउप च यज्ञस्य शिवे सन्तिष्ठस्व स्विष्टे मे संतिष्ठस्व ॥ १९ ॥

अग्नेऽदब्धायोऽशीतम पाहि मा दिद्योः पाहि प्रसित्यै पाहि दुरिष्ट्यै पाहि दुरद्मन्याऽअविषं नः पितुं कृणु । सुषदा योनौ स्वाहा वाडग्नये संवेशपतये स्वाहा सरस्वत्यै यशोभगिन्यै स्वाहा ॥ २० ॥

वेदोऽसि येन त्वं देव वेद देवेभ्यो वेदोऽभवस्तेन मह्यं वेदो भूयाः। देवा गातुविदो गातुं वित्त्वा गातुमित । मनसस्पतऽइमं देव यज्ञꣳ स्वाहा वाते धाः २१॥

संबर्हिरङ्क्ताꣳ हविषा घृतेन समादित्यैर्वसुभिः सम्मरुद्भिः ।
समिन्द्रो विश्वदेवेभिरङ्क्तां दिव्यं नभो गच्छतु यत् स्वाहा ॥ २२ ॥

कस्त्वा विमुञ्चति स त्वा विमुञ्चति कस्मै त्वा विमुञ्चति तस्मै त्वा विमुञ्चति।
पोषाय रक्षसां भागोऽसि ॥ २३ ॥

सं वर्चसा पयसा सं तनूभिरगन्महि मनसा सꣳ शिवेन ।
त्वष्टा सुदत्रो विदधातु रायोऽनुमार्ष्टु तन्वो यद्विलिष्टम् ॥ २४ ॥

दिवि विष्णुर्व्यक्रꣳस्त जागतेन च्छंदसा ततो निर्भक्तो योऽस्मान्द्वेष्टि यं च वयं द्विष्मोऽन्तरिक्षे विष्णुर्व्यक्रꣳस्त त्रैष्टुभेन च्छंदसा ततो निर्भक्तो योऽस्मान्द्वेष्टि यं च वयं द्विष्मः पृथिव्यां विष्णुर्व्यक्रꣳस्त गायत्रेण च्छन्दसा ततो निर्भक्तो योऽस्मान्द्वेष्टि यं च वयं द्विष्मोऽस्मादन्नादस्यै प्रतिष्ठाया ऽअगन्म स्वः सं ज्योतिषाभूम ॥ २५ ॥

स्वयंभूरसि श्रेष्ठो रश्मिर्वर्चोदा ऽअसि वर्चो मे देहि। सूर्यस्यावृतमन्वावर्ते ॥ २६ ॥

अग्ने गृहपते सुगृहपतिस्त्वयाऽग्नेऽहं गृहपतिना भूयासꣳ सुगृहपतिस्त्वं मयाऽग्ने गृहपतिना भूयाः। अस्थूरि णौ गार्हपत्यानि सन्तु शतꣳ हिमाः सूर्यस्यावृतमन्वावर्ते ॥२७॥

अग्ने व्रतपते व्रतमचारिषं तदशकं तन्मेऽराधीदमहं य ऽएवाऽस्मि सोऽस्मि ॥ २८ ॥

अग्नये कव्यवाहनाय स्वाहा सोमाय पितृमते स्वाहा।
अपहता ऽअसुरा रक्षाꣳसि वेदिषदः ॥ २९ ॥

ये रूपाणि प्रतिमुञ्चमाना ऽअसुराः सन्तः स्वधया चरन्ति।
परापुरो निपुरो ये भरन्त्यग्निष्टाँल्लोकात्प्रणुदात्यस्मात् ॥ ३० ॥

अत्र पितरो मादयध्वं यथाभागमावृषायध्वम्।
अमीमदन्त पितरो यथाभागमावृषायिषत ॥ ३१ ॥

नमो वः पितरो रसाय नमो वः पितरः शोषाय नमो वः पितरो जीवाय नमो वः पितरः स्वधायै नमो वः पितरो घोराय नमो वः पितरो मन्यवे नमो वः पितरः पितरो नमो वो गृहान्नः पितरो दत्त सतो वः पितरो देष्मैतद्वः पितरो वासऽआधत्त ॥ ३२ ॥

आधत्त पितरो गर्भं कुमारं पुष्करस्रजम्। यथेह पुरुषोऽसत् ॥ ३३ ॥

ऊर्जं वहन्तीरमृतं घृतं पयः कीलालं परिस्रुतम्। स्वधा स्थ तर्पयत मे पितॄन् ॥३४॥

इति द्वितीयोऽध्यायः।

अथ तृतीयोऽध्यायः ।

समिधाग्निं दुवस्यत घृतैर्बोधयतातिथिम् । आस्मिन्हव्या जुहोतन ॥ १ ॥

सुसमिद्धाय शोचिषे घृतं तीव्रं जुहोतन । अग्नये जातवेदसे ॥ २ ॥

तं त्वा समिद्भिरङ्गिरो घृतेन वर्धयामसि । बृहच्छोचा यविष्ठ्य ॥ ३ ॥

उप त्वाग्ने हविष्मतीर्घृताचीर्यन्तु हर्यत । जुषस्व समिधो मम ॥ ४ ॥

भूर्भुवः स्वर्द्यौरिव भूम्ना पृथिवीव वरिम्णा ।
तस्यास्ते पृथिवि देवयजनि पृष्ठेऽग्निमन्नादमन्नाद्यायादधे ॥ ५ ॥

आयं गौः पृश्निरक्रमीदसदन् मातरं पुरः । पितरं च प्रयन्त्स्वः ॥ ६ ॥

अन्तश्चरति रोचनास्य प्राणादपानती । व्यख्यन् महिषो दिवम् ॥ ७ ॥

त्रिꣳशद्धाम विराजति वाक् पतङ्गाय धीयते । प्रति वस्तोरह द्युभिः ॥ ८ ॥

अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहा ।
अग्निर्वर्चो ज्योतिर्वर्चः स्वाहा सूर्यो वर्चो ज्योतिर्वर्चः स्वाहा ।
ज्योतिः सूर्यः सूर्यो ज्योतिः स्वाहा ॥ ९ ॥

सजूर्देवेन सवित्रा सजू रात्र्येन्द्रवत्या । जुषाणोऽअग्निर्वेतु स्वाहा ।
सजूर्देवेन सवित्रा सजूरुषसेन्द्रवत्या । जुषाणः सूर्यो वेतु स्वाहा ॥ १० ॥

उपप्रयन्तोऽअध्वरं मन्त्रं वोचेमाग्नये । आरेऽअस्मे च शृण्वते ॥ ११ ॥
अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्याऽअयम् । अपाꣳ रेताꣳसि जिन्वति ॥ १२ ॥

उभा वामिन्द्राग्नीऽआहुवध्याऽउभा राधसः सह मादयध्यै ।
उभा दातारविषाꣳ रयीणामुभा वाजस्य सातये हुवे वाम् ॥ १३ ॥

अयं ते योनिर्ऋत्वियो यतो जातोऽअरोचथाः ।
तं जानन्नग्नऽआरोहाथा नो वर्धया रयिम् ॥ १४ ॥

अयमिह प्रथमो धायि धातृभिर्होता यजिष्ठोऽअध्वरेष्वीड्यः ।
यमप्नवानो भृगवो विरुरुचुर्वनेषु चित्रं विभ्वं विशेविशे ॥ १५ ॥

अस्य प्रत्नामनु द्युतंᳫं शुक्रं दुदुह्रे ऽ अह्रयः । पयः सहस्रसामृषिम् ॥ १६ ॥

तनूपा ऽ अंग्नेऽसि तन्वं मे पाह्यायुर्दा ऽ अंग्नेऽस्यायुर्मे देहि वर्चोदा ऽ अंग्नेऽसि वर्चो मे देहि । अग्ने यन्मे तन्वा ऽ ऊनं तन्म ऽ आपृण ॥ १७ ॥

इन्धानास्त्वा शतंᳫं हिमा द्युमन्तंᳫं समिधीमहि । वयस्वन्तो वयस्कृतंᳫं सहस्वन्तः सहस्कृतम् । अग्ने सपत्नदम्भनमदब्धासो ऽ अदाभ्यम् । चित्रावसो स्वस्ति ते पारमशीय ॥ १८ ॥

सं त्वमग्ने सूर्यस्य वर्चसागथाः समृषीणाᳫं स्तुतेन । सं प्रियेण धाम्ना समहमायुषा सं वर्चसा सं प्रजया सᳫं रायस्पोषेण ग्मिषीय ॥ १९ ॥

अन्ध स्थान्धो वो भक्षीय मह स्थ महो वो भक्षीयोर्ज स्थोर्जं वो भक्षीय रायस्पोष स्थ रायस्पोषं वो भक्षीय ॥ २० ॥

रेवती रमध्वमस्मिन्योनावस्मिन् गोष्ठेऽस्मिँल्लोकेऽस्मिन् क्षये । इहैव स्त मापगात ॥२१॥

सᳫंहितासि विश्वरूप्यूर्जा माविश गौपत्येन ।
उप त्वाग्ने दिवेदिवे दोषावस्तर्धिया वयम् । नमो भरन्त ऽ एमसि ॥ २२ ॥

राजन्तमध्वराणां गोपामृतस्य दीदिविम् । वर्धमानंᳫं स्वे दमे ॥ २३ ॥

स नः पितेव सूनवेऽग्ने सूपायनो भव । सचस्वा नः स्वस्तये ॥ २४ ॥

अग्ने त्वं नो ऽ अन्तम ऽ उत त्राता शिवो भवा वरूथ्यः ।
वसुरग्निर्वसुश्रवा ऽ अच्छा नक्षि द्युमत्तमᳫं रयिं दाः ॥ २५ ॥

तं त्वा शोचिष्ठ दीदिवः सुम्नाय नूनमीमहे सखिभ्यः ।
स नो बोधि श्रुधी हवमुरुष्या णो ऽ अघायतः समस्मात् ॥ २६ ॥

इड ऽ एह्यदित ऽ एहि काम्या ऽ एत । मयि वः कामधरणं भूयात् ॥ २७ ॥

सोमानᳫं स्वरणं कृणुहि ब्रह्मणस्पते । कक्षीवन्तं य ऽ औशिजः ॥ २८ ॥

यो रेवान्योऽअमीवहा वसुवित्पुष्टिवर्द्धनः । स नः सिषक्तु यस्तुरः ॥ २९ ॥

मा नः शᳫंसोऽअररुषो धूर्तिः प्रणङ् मर्त्यस्य । रक्षा णो ब्रह्मणस्पते ॥ ३० ॥

महि त्रीणामवोऽस्तु द्युक्षं मित्रस्यार्यम्णः । दुराधर्षं वरुणस्य ॥ ३१ ॥

नहि तेषाममा चन नाध्वसु वारणेषु । ईशे रिपुरघशꣳसः ॥ ३२ ॥

ते हि पुत्रासो ऽअदितेः प्र जीवसे मर्त्याय । ज्योतिर्यच्छन्त्यजस्रम् ॥ ३३ ॥

कदा चन स्तरीरसि नेन्द्र सश्चसि दाशुषे ।
उपोपेन्नु मघवन् भूय ऽइन्नु ते दानं देवस्य पृच्यते ॥ ३४ ॥

तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् ॥३५ ॥

परि ते दूडभो रथोऽस्माँ२ ऽ अश्नोतु विश्वतः । येन रक्षसि दाशुषः ॥ ३६ ॥

भूर्भुवः स्वः सुप्रजाः प्रजाभिः स्याꣳ सुवीरो वीरैः सुपोषः पोषैः ।
नर्य प्रजां मे पाहि शꣳस्य पशून्मे पाह्यथर्य पितुं मे पाहि ॥ ३७ ॥

आगन्म विश्ववेदसमस्मभ्यं वसुवित्तमम् । अग्ने सम्राडभि द्युम्नमभि सहऽआयच्छस्व ॥३८ ॥

अयमग्निर्गृहपतिर्गार्हपत्यः प्रजाया वसुवित्तमः ।
अग्ने गृहपतेऽभि द्युम्नमभि सह ऽआयच्छस्व ॥ ३९ ॥

अयमग्निः पुरीष्यो रयिमान् पुष्टिवर्धनः । अग्ने पुरीष्याभि द्युम्नमभि सहऽआयच्छस्व ॥४० ॥

गृहा मा बिभीत मा वेपध्वमूर्जं बिभ्रत ऽ एमसि ।
ऊर्जं बिभ्रद्वः सुमनाः सुमेधा गृहानैमि मनसा मोदमानः ॥ ४१ ॥

येषामध्येति प्रवसन्येषु सौमनसो बहुः । गृहानुपह्वयामहे ते नो जानन्तु जानतः ॥ ४२ ॥

उपहूताऽइह गावऽउपहूताऽअजावयः । अथोऽअन्नस्य कीलालऽउपहूतो गृहेषु नः ।
क्षेमाय वः शान्त्यै प्रपद्ये शिवꣳ शग्मꣳ शंयोः शंयोः ॥ ४३ ॥

प्रघासिनो हवामहे मरुतश्च रिशादसः । करम्भेण सजोषसः ॥ ४४ ॥

यद्ग्रामे यदरण्ये यत्सभायां यदिन्द्रिये । यदेनश्चकृमा वयमिदं तदवयजामहे स्वाहा ॥ ४५ ॥

मो षू णऽइन्द्रात्र पृत्सु देवैरस्ति हि ष्मा ते शुष्मिन्नवयाः ।
महश्चिद्यस्य मीढुषो यव्या हविष्मतो मरुतो वन्दते गीः ॥ ४६ ॥

अक्रन् कर्म कर्मकृतः सह वाचा मयोभुवा । देवेभ्यः कर्म कृत्वास्तं प्रेत सचाभुवः ॥ ४७ ॥

अवभृथ निचुम्पुण निचेरुरसि निचुम्पुणः । अव देवैर्देवकृतमेनोऽयासिषमव मर्त्यैर्मर्त्य-
कृतं पुरुराव्णो देव रिषस्पाहि ॥ ४८ ॥

पूर्णा दर्वि परा पत सुपूर्णा पुनरापत । वस्नेव विक्रीणावहा ऽइषमूर्जंᳬ शतक्रतो ॥ ४९ ॥
देहि मे ददामि ते नि मे धेहि नि ते दधे । निहारं च हरासि मे निहारं निहराणि ते स्वाहा ॥ ५० ॥

अक्षन्नमीमदन्त ह्यव प्रिया ऽअधूषत ।
अस्तोषत स्वभानवो विप्रा नविष्ठया मती योजा न्विन्द्र ते हरी ॥ ५१ ॥

सुसन्दृशं त्वा वयं मघवन्वन्दिषीमहि ।
प्र नूनं पूर्णवन्धुर स्तुतो यासि वशाँ२ ऽअनु योजा न्विन्द्र ते हरी ॥ ५२ ॥

मनो न्वाह्वामहे नाराशᳬंसेन स्तोमेन । पितॄणां च मन्मभिः ॥ ५३ ॥

आ न ऽएतु मनः पुनः क्रत्वे दक्षाय जीवसे । ज्योक् च सूर्यं दृशे ॥ ५४ ॥

पुनर्नः पितरो मनो ददातु दैव्यो जनः । जीवं व्रातंᳬ सचेमहि ॥ ५५ ॥

वयंᳬ सोम व्रते तव मनस्तनूषु बिभ्रतः । प्रजावन्तः सचेमहि ॥ ५६ ॥

एष ते रुद्र भागः सह स्वस्राम्बिकया तं जुषस्व स्वाहैष ते रुद्र भाग ऽआखुस्ते पशुः ॥ ५७

अव रुद्रमदीमह्यव देवं त्र्यम्बकम् ।
यथा नो वस्यसस्करद्यथा नः श्रेयसस्करद्यथा नो व्यवसाययात् ॥ ५८ ॥

भेषजमसि भेषजं गवेऽश्वाय पुरुषाय भेषजम् । सुखं मेषाय मेष्यै ॥ ५९ ॥

त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् । उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात् ।
त्र्यम्बकं यजामहे सुगन्धिं पतिवेदनम् । उर्वारुकमिव बन्धनादितो मुक्षीय मामुतः ॥ ६० ॥

एतत्ते रुद्रावसं तेन परो मूजवतोऽतीहि ।
अवततधन्वा पिनाकावसः कृत्तिवासा ऽअहिᳬंसन्नः शिवोऽतीहि ॥ ६१ ॥

त्र्यायुषं जमदग्नेः कश्यपस्य त्र्यायुषम् । यद्देवेषु त्र्यायुषं तन्नो ऽअस्तु त्र्यायुषम् ॥ ६२ ॥

शिवो नामासि स्वधितिस्ते पिता नमस्ते ऽअस्तु मा मा हिᳬंसीः ।
निवर्त्तयाम्यायुषेऽन्नाद्याय प्रजननाय रायस्पोषाय सुप्रजास्त्वाय सुवीर्याय ॥ ६३ ॥

इति तृतीयोऽध्यायः ।

अथ चतुर्थोऽध्यायः ।

एदमगन्म देवयजनं पृथिव्या यत्र देवासो ऽअजुषन्त विश्वे ।
ऋक्सामाभ्याꣳ सन्तरन्तो यजुर्भी रायस्पोषेण समिषा मदेम। इमाऽआपः शमु मे सन्तु
देवीरोषधे त्रायस्व स्वधिते मैनꣳ हिꣳसीः ॥ १ ॥

आपोऽअस्मान्मातरः शुन्धयन्तु घृतेन नो घृतप्वः पुनन्तु । विश्वꣳ हि रिप्रं प्रवहन्ति
देवीरुदिदाभ्यः शुचिरा पूतऽएमि। दीक्षातपसोस्तनूरसि तां त्वा शिवाꣳ शग्मां परि-
दधे भद्रं वर्णं पुष्यन् ॥ २ ॥

महीनां पयोऽसि वर्चोदा ऽअसि वर्चो मे देहि ।
वृत्रस्यासि कनीनकश्चक्षुर्दा ऽअसि चक्षुर्मे देहि ॥ ३ ॥

चित्पतिर्मा पुनातु वाक्पतिर्मा पुनातु देवो मा सविता पुनात्वच्छिद्रेण पवित्रेण सूर्यस्य
रश्मिभिः । तस्य ते पवित्रपते पवित्रपूतस्य यत्कामः पुने तच्छकेयम् ॥ ४ ॥

आ वो देवासऽईमहे वामं प्रयत्यध्वरे । आ वो देवासऽआशिषो यज्ञियासो हवामहे ५॥

स्वाहा यज्ञं मनसः स्वाहोरोरन्तरिक्षात् स्वाहा द्यावापृथिवीभ्याꣳ स्वाहा वातादारभे
स्वाहा ॥ ६ ॥

आकूत्यै प्रयुजेऽग्नये स्वाहा मेधायै मनसेऽग्नये स्वाहा दीक्षायै तपसेऽग्नये स्वाहा सरस्व-
त्यै पूष्णेऽग्नये स्वाहा । आपो देवीर्बृहतीर्विश्वशम्भुवो द्यावापृथिवी ऽउरो ऽअन्तरिक्ष।
बृहस्पतये हविषा विधेम स्वाहा ॥ ७ ॥

विश्वो देवस्य नेतुर्मर्तो वुरीत सख्यम् ।
विश्वो रायऽइषुध्यति द्युम्नं वृणीत पुष्यसे स्वाहा ॥ ८ ॥

ऋक्सामयोः शिल्पे स्थस्ते वामारभे ते मा पातमास्य यज्ञस्योदृचः ।
शर्मासि शर्म मे यच्छ नमस्ते ऽअस्तु मा मा हिꣳसीः ॥ ९ ॥

ऊर्गस्याङ्गिरस्यूर्णम्रदाऽऊर्जं मयि धेहि । सोमस्य नीविरसि विष्णोः शर्मासि शर्म यज-
मानस्येन्द्रस्य योनिरसि सुसस्याः कृषीस्कृधि । उच्छ्रयस्व वनस्पतऽऊर्ध्वो मा पाह्यꣳ-
हस ऽआस्य यज्ञस्योदृचः ॥ १० ॥

व्रतं कृणुताग्निर्ब्रह्माग्निर्यज्ञो वनस्पतिर्यज्ञियः । दैवीं धियं मनामहे सुमृडीकामभिष्टये
वर्चोधां यज्ञवाहसꣳ सुतीर्था नोऽअसद्वशे । ये देवा मनोजाता मनोयुजो दक्षक्रतवस्ते
नोऽवन्तु ते नः पान्तु तेभ्यः स्वाहा ॥ ११ ॥

श्वात्राः पीता भवत यूयमापोऽअस्माकमन्तरुदरे सुशेवाः ।
ताऽअस्मभ्यमयक्ष्माऽअनमीवाऽअनागसः स्वदन्तु देवीरमृताऽऋतावृधः ॥ १२ ॥

इयं ते यज्ञिया तनूरपो मुञ्चामि न प्रजाम् ।
अꣳहोमुचः स्वाहाकृताः पृथिवीमाविशत पृथिव्या सम्भव ॥ १३ ॥

अग्ने त्वꣳ सु जागृहि वयꣳ सु मन्दिषीमहि ।
रक्षा णोऽअप्रयुच्छन् प्रबुधे नः पुनस्कृधि ॥ १४ ॥

पुनर्मनः पुनरायुर्मऽआगन् पुनः प्राणः पुनरात्मा मऽआगन् पुनश्चक्षुः पुनः श्रोत्रं
मऽआगन् । वैश्वानरोऽअदब्धस्तनूपाऽअग्निर्नः पातु दुरितादवद्यात् ॥ १५ ॥

त्वमग्ने व्रतपाऽअसि देवऽआ मर्त्येष्वा । त्वं यज्ञेष्वीड्यः ।
रास्वेयत्सोमा भूयो भर देवो नः सविता वसोर्दाता वस्वदात् ॥ १६ ॥

एषा ते शुक्र तनूरेतद्वर्चस्तया सम्भव भ्राजं गच्छ ।
जूरसि धृता मनसा जुष्टा विष्णवे ॥ १७ ॥

तस्यास्ते सत्यसवसः प्रसवे तन्वो यन्त्रमशीय स्वाहा ।
शुक्रमसि चन्द्रमस्यमृतमसि वैश्वदेवमसि ॥ १८ ॥

चिदसि मनासि धीरसि दक्षिणासि क्षत्रियासि यज्ञियास्यदितिरस्युभयतःशीर्ष्णी । सा
नः सुप्राची सुप्रतीच्येधि मित्रस्त्वा पदि बध्नीतां पूषाध्वनस्पात्विन्द्रायाध्यक्षाय ॥१९॥

अनु त्वा माता मन्यतामनु पितानु भ्राता सगर्भ्योऽनु सखा सयूथ्यः ।
सा देवि देवमच्छेहीन्द्राय सोमꣳ रुद्रस्त्वावर्त्तयतु स्वस्ति सोमसखा पुनरेहि ॥ २० ॥

वस्व्यस्यदितिरस्यादित्यासि रुद्रासि चन्द्रासि ।
बृहस्पतिष्ट्वा सुम्ने रम्णातु रुद्रो वसुभिराचके ॥ २१ ॥

अदित्यास्त्वा मूर्द्धन्नाजिघर्मि देवयजने पृथिव्याऽइडायास्पदमसि घृतवत् स्वाहा । अस्मे

रेमस्वास्मे ते बन्धुस्त्वे रायो मे रायो मा वयꣳ रायस्पोषेण वियौष्म तोतो रायः ॥२२॥

समख्ये देव्या धिया सं दक्षिणयोरुचक्षसा ।
मा म ऽआयुः प्रमोषीर्मो ऽअहं तव वीरं विदेय तव देवि सन्दृशि ॥ २३ ॥

एष ते गायत्रो भाग ऽइति मे सोमाय ब्रूतादेष ते त्रैष्टुभो भाग ऽइति मे सोमाय ब्रूता-
देष ते जागतो भाग ऽइति मे सोमाय ब्रूताच्छन्दोनामानाꣳ साम्राज्यं गच्छेति मे सो-
माय ब्रूतादास्माको ऽसि शुक्रस्ते ग्रह्यो विचितस्त्वा विचिन्वन्तु ॥ २४ ॥

अभि त्यं देवꣳ सवितारमोण्योः कविक्रतुमर्चामि सत्यसवꣳ रत्नधामभि प्रियं मतिं
कविम् । ऊर्ध्वा यस्यामतिर्भा ऽअदिद्युतत्सवीमनि हिरण्यपाणिरमिमीत सुक्रतुः कृपा
स्वः । प्रजाभ्यस्त्वा प्रजास्त्वानुप्राणन्तु प्रजास्त्वमनुप्राणिहि ॥ २५ ॥

शुक्रं त्वा शुक्रेण क्रीणामि चन्द्रं चन्द्रेणामृतममृतेन ।
सग्मे ते गोरस्मे ते चन्द्राणि तपसस्तनूरसि प्रजापतेर्वर्णः परमेण पशुना क्रीयसे
सहस्रपोषं पुषेयम् ॥ २६ ॥

मित्रो न ऽएहि सुमित्रध ऽइन्द्रस्योरुमाविश दक्षिणमुशन्नुशन्तꣳ स्योनः स्योनम् । स्वान
भ्राजाङ्घारे बम्भारे हस्त सुहस्त कृशानवेते वः सोमक्रयणास्तान्रक्षध्वं मा वो दभन् ॥२७॥

परि माग्ने दुश्चरिताद्बाधस्वा मा सुचरिते भज ।
उदायुषा स्वायुषोदस्थाममृताँ२ऽअनु ॥ २८ ॥

प्रति पन्थामपद्महि स्वस्तिगामनेहसम् । येन विश्वाः परि द्विषो वृणक्ति विन्दते वसु ॥२९॥

अदित्यास्त्वगस्यदित्यै सद ऽआसीद ।
अस्तभ्नाद्द्यां वृषभो ऽअन्तरिक्षममिमीत वरिमाणं पृथिव्याः ।
आसीदद्विश्वा भुवनानि सम्राड्विश्वेत्तानि वरुणस्य व्रतानि ॥ ३० ॥

वनेषु व्यन्तरिक्षं ततान वाजमर्वत्सु पय ऽउस्रियासु ।
हृत्सु क्रतुं वरुणो विक्ष्वग्निं दिवि सूर्यमदधात् सोममद्रौ ॥ ३१ ॥

सूर्यस्य चक्षुरारोहाग्नेरक्ष्णः कनीनकम् । यत्रैतशेभिरीयसे भ्राजमानो विपश्चिता ॥३२ ॥

उस्रावेतं धूर्षाहौ युज्येथामनश्रू ऽअवीरहणौ ब्रह्मचोदनौ ।

स्वस्ति यजमानस्य गृहान् गच्छतम् ॥ ३३ ॥

भद्रो मेऽसि प्रच्यवस्व भुवस्पते विश्वान्यभि धामानि ।
मा त्वा परिपरिणो विदन् मा त्वा परिपन्थिनो विदन् मा त्वा वृकाऽअघायवो विदन् ।
श्येनो भूत्वा परापत यजमानस्य गृहान् गच्छ तन्नौ सँस्कृतम् ॥ ३४ ॥

नमो मित्रस्य वरुणस्य चक्षसे महो देवाय तदृतꣳ सपर्यत ।
दूरेदृशे देवजाताय केतवे दिवस्पुत्राय सूर्याय शꣳसत ॥ ३५ ॥

वरुणस्योत्तम्भनमसि वरुणस्य स्कम्भसर्जनी स्थो वरुणस्यऽऋतसदन्यसि वरुणस्य ऽऋतसदनमसि वरुणस्यऽऋतसदनमासीद ॥ ३६ ॥

या ते धामानि हविषा यजन्ति ता ते विश्वा परिभूरस्तु यज्ञम् ।
गयस्फानः प्रतरणः सुवीरोऽवीरहा प्रचरा सोम दुर्यान् ॥ ३७ ॥

॥ इति चतुर्थोऽध्यायः ॥

अथ पञ्चमोऽध्यायः ।

अग्नेस्तनूरसि विष्णवे त्वा सोमस्य तनूरसि विष्णवे त्वातिथेरातिथ्यमसि विष्णवे त्वा श्येनाय त्वा सोमभृते विष्णवे त्वाग्नये त्वा रायस्पोषदे विष्णवे त्वा ॥ १ ॥

अग्नेर्जनित्रमसि वृषणौ स्थऽउर्वश्यस्यायुरसि पुरूरवाऽअसि । गायत्रेण त्वा छन्दसा मन्थामि त्रैष्टुभेन त्वा छन्दसा मन्थामि जागतेन त्वा छन्दसा मन्थामि ॥ २ ॥

भवतं नः समनसौ सचेतसावरेपसौ । मा यज्ञꣳ हिꣳसिष्टं मा यज्ञपतिं जातवेदसौ शिवौ भवतमद्य नः ॥ ३ ॥

अग्नावग्निश्चरति प्रविष्टऽऋषीणां पुत्रोऽअभिशस्तिपावा ।
स नः स्योनः सुयजा यजेह देवेभ्यो हव्यꣳ सदमप्रयुच्छन्त्स्वाहा ॥ ४ ॥

आपतये त्वा परिपतये गृह्णामि तनूनप्त्रे शाक्वराय शक्वनऽओजिष्ठाय । अनाधृष्टमस्यनाधृष्यं देवानामोजोऽनभिशस्त्यभिशस्तिपाऽअनभिशस्तेन्यमञ्जसा सत्यमुपगेषꣳ स्विते मा धाः ॥ ५ ॥

अग्ने व्रतपास्त्वे व्रतपा या तव तनूरियꣳ सा मयि यो मम तनूरेषा सा त्वयि ।
सह नौ व्रतपते व्रतान्यनु मे दीक्षां दीक्षापतिर्मन्यतामनु तपस्तपस्पतिः ॥ ६ ॥

अꣳशुरꣳशुष्टे देव सोमाप्यायतामिन्द्रायैकधनविदे ।
आ तुभ्यमिन्द्रः प्यायतामा त्वमिन्द्राय प्यायस्व ।
आप्याययास्मान्त्सखीन्त्सन्या मेधया स्वस्ति ते देव सोम सुत्यामशीय ।
एष्टा रायः प्रेषे भगायऽऋतमृतवादिभ्यो नमो द्यावापृथिवीभ्याम् ॥ ७ ॥

या तेऽअग्नेऽयःशया तनूर्वर्षिष्ठा गह्वरेष्ठा । उग्रं वचोऽअपावधीत्त्वेषं वचोऽअपावधीत् स्वाहा । या तेऽअग्ने रजःशया तनूर्वर्षिष्ठा गह्वरेष्ठा । उग्रं वचोऽअपावधीत्त्वेषं वचोऽअपावधीत् स्वाहा । या तेऽअग्ने हरिशया तनूर्वर्षिष्ठा गह्वरेष्ठा । उग्रं वचोऽअपावधीत्त्वेषं वचोऽअपावधीत् स्वाहा ॥ ८ ॥

तप्तायनी मेऽसि वित्तायनी मेऽस्यवतान्मा नाथितादवतान्मा व्यथितात् । विदेदग्निर्नभो नामाग्नेऽअङ्गिरऽआयुना नाम्नेहि योऽस्यां पृथिव्यामसि यत्तेऽनाधृष्टं नाम यज्ञियं तेन त्वा दधे विदेदग्निर्नभो नामाग्नेऽअङ्गिरऽआयुना नाम्नेहि यो द्वितीयस्यां पृथिव्यामसि यत्तेऽनाधृष्टं नाम यज्ञियं तेन त्वा दधे विदेदग्निर्नभो नामाग्नेऽअङ्गिरऽआयुना नाम्नेहि यस्तृतीयस्यां पृथिव्यामसि यत्तेऽनाधृष्टं नाम यज्ञियं तेन त्वा दधे । अनु त्वा देववीतये ॥९॥

सिꣳह्यसि सपत्नसाही देवेभ्यः कल्पस्व सिꣳह्यसि सपत्नसाही देवेभ्यः शुन्धस्व सिꣳह्यसि सपत्नसाही देवेभ्यः शुम्भस्व ॥ १० ॥

इन्द्रघोषस्त्वा वसुभिः पुरस्तात्पातु प्रचेतास्त्वा रुद्रैः पश्चात्पातु मनोजवास्त्वा पितृभिर्दक्षिणतः पातु विश्वकर्मा त्वादित्यैरुत्तरतः पात्विदमहं तप्तं वार्बहिर्धा यज्ञान्निःसृजामि ॥ ११ ॥

सिꣳह्यसि स्वाहा सिꣳह्यस्यादित्यवनिः स्वाहा सिꣳह्यसि ब्रह्मवनिः क्षत्रवनिः स्वाहा सिꣳह्यसि सुप्रजावनी रायस्पोषवनिः स्वाहा सिꣳह्यस्यावह देवान्यजमानाय स्वाहा भूतेभ्यस्त्वा ॥ १२ ॥

ध्रुवोऽसि पृथिवीं दृꣳह ध्रुवक्षिदस्यन्तरिक्षं दृꣳहाच्युतक्षिदसि दिवं दृꣳहाग्नेः पुरीषमसि १३

युञ्जते मनऽउत युञ्जते धियो विप्रा विप्रस्य बृहतो विपश्चितः ।
वि होत्रा दधे वयुनाविदेकऽइन्मही देवस्य सवितुः परिष्टुतिः स्वाहा ॥ १४ ॥

इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् । समूढमस्य पाꣳसुरे स्वाहा ॥ १५ ॥

इरावती धेनुमती हि भूतꣳ सूयवसिनी मनवे दशस्या ।
व्यस्कभ्ना रोदसी विष्णवेते दाधर्थ पृथिवीमभितो मयूखैः स्वाहा ॥ १६ ॥

देवश्रुतौ देवेष्वाघोषतं प्राची प्रेतमध्वरं कल्पयन्ती ऽऊर्ध्वं यज्ञं नयतं मा जिह्वरतम् ।
स्वं गोष्ठमावदतं देवी दुर्ये ऽआयुर्मा निर्वादिष्टं प्रजां मा निर्वादिष्टमत्र रमेथां वर्ष्मन्
पृथिव्याः ॥ १७ ॥

विष्णोर्नुकं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजाꣳसि ।
यो ऽअस्कभायदुत्तरꣳ सधस्थं विचक्रमाणस्त्रेधोरुगायो विष्णवे त्वा ॥ १८ ॥

दिवो वा विष्ण ऽउत वा पृथिव्या महो वा विष्ण ऽउरोरन्तरिक्षात् ।
उभा हि हस्ता वसुना पृणस्वा प्रयच्छ दक्षिणादोत सव्याद्विष्णवे त्वा ॥ १९ ॥

प्र तद्विष्णु स्तवते वीर्येण मृगो न भीमः कुचरो गिरिष्ठाः ।
यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियन्ति भुवनानि विश्वा ॥ २० ॥

विष्णो रराटमसि विष्णोः श्नप्त्रे स्थो विष्णोः स्यूरसि विष्णोर्ध्रुवोऽसि ।
वैष्णवमसि विष्णवे त्वा ॥ २१ ॥

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् ।
आददे नार्यसीदमहꣳ रक्षसां ग्रीवा ऽअपिकृन्तामि ।
बृहन्नसि बृहद्रवा बृहतीमिन्द्राय वाचं वद ॥ २२ ॥

रक्षोहणं वलगहनं वैष्णवीमिदमहं तं वलगमुत्किरामि यं मे निष्ट्यो यममात्यो निच-
खानेदमहं तं वलगमुत्किरामि यं मे समानो यमसमानो निचखानेदमहं तं वलगमुत्किरामि
यं मे सबन्धुर्यमसबन्धुर्निचखानेदमहं तं वलगमुत्किरामि यं मे सजातो यमसजातो नि-
चखानोत्कृत्यां किरामि ॥ २३ ॥

स्वराडसि सपत्नहा सत्रराडस्यभिमातिहा जनराडसि रक्षोहा सर्वराडस्यमित्रहा ॥ २४ ॥

रक्षोहणो वो वलगहनः प्रोक्षामि वैष्णवान्रक्षोहणो वो वलगहनोऽवनयामि वैष्णवान्र-
क्षोहणो वो वलगहनोऽवस्तृणामि वैष्णवान्रक्षोहणौ वां वलगहना ऽउपदधामि वैष्णवी
रक्षोहणौ वां वलगहनौ पर्यूहामि वैष्णवी वैष्णवमसि वैष्णवा स्थ ॥ २५ ॥

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् ।
आददे नार्यसीदमहꣳ रक्षसां ग्रीवा ऽ अपिकृन्तामि। यवोऽसि यवयास्मद्द्वेषो यवयारातीर्दिवे त्वान्तरिक्षाय त्वा पृथिव्यै त्वा शुन्धन्ताँल्लोकाः पितृषदनाः पितृषदनमसि॥ २६ ॥

उद्दिवꣳ स्तभानान्तरिक्षं पृण दृꣳहस्व पृथिव्यां द्युतानस्त्वा मारुतो मिनोतु मित्रावरुणौ ध्रुवेण धर्मणा । ब्रह्मवनि त्वा क्षत्रवनि रायस्पोषवनि पर्यूहामि। ब्रह्म दृꣳह क्षत्रं दृꣳहायुर्दृꣳह प्रजां दृꣳह ॥ २७ ॥

ध्रुवासि ध्रुवोऽयं यजमानोऽस्मिन्नायतने प्रजया पशुभिर्भूयात् ।
घृतेन द्यावापृथिवी पूर्येथामिन्द्रस्य छदिरसि विश्वजनस्य छाया ॥ २८ ॥

परि त्वा गिर्वणो गिर ऽ इमा भवन्तु विश्वतः ।
वृद्धायुमनु वृद्धयो जुष्टा भवन्तु जुष्टयः॥ २९ ॥

इन्द्रस्य स्यूरसीन्द्रस्य ध्रुवोऽसि । ऐन्द्रमसि वैश्वदेवमसि ॥ ३० ॥

विभूरसि प्रवाहणो वह्निरसि हव्यवाहनः । श्वात्रोऽसि प्रचेतास्तुथोऽसि विश्ववेदाः ३१॥

उशिगसि कविरङ्घारिरसि बम्भारिरवस्यूरसि दुवस्वाञ्छुन्ध्यूरसि मार्जालीयः
सम्राडसि कृशानुः परिषद्योऽसि पवमानो नभोऽसि प्रतक्वा मृष्टोऽसि हव्यसूदन ऽ ऋतधामासि स्वर्ज्योतिः ॥ ३२ ॥

समुद्रोऽसि विश्वव्यचा ऽ अजोऽस्येकपादहिरसि बुध्न्यो वागस्यैन्द्रमसि सदोऽस्यृतस्य द्वारौ मा मा सन्ताप्तमध्वनामध्वपते प्र मा तिर स्वस्ति मेऽस्मिन्पथि देवयाने भूयात् ॥ ३३॥

मित्रस्य मा चक्षुषेक्षध्वमग्नयः सगराः सगरा स्थ सगरेण नाम्ना रौद्रेणानीकेन पात माग्नयः पिपृत माग्नयो गोपायत मा नमो वोऽस्तु मा मा हिꣳसिष्ट ॥ ३४ ॥

ज्योतिरसि विश्वरूपं विश्वेषां देवानाꣳ समित्। त्वꣳ सोम तनूकृद्भ्यो द्वेषोभ्योऽन्यकृतेभ्य ऽ उरु यन्तासि वरूथꣳ स्वाहा जुषाणो ऽ अप्तुराज्यस्य वेतु स्वाहा ॥ ३५ ॥

अग्ने नय सुपथा राये ऽ अस्मान्विश्वानि देव वयुनानि विद्वान् ।
युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नम ऽ उक्तिं विधेम ॥ ३६ ॥
अयं नो ऽ अग्निर्वरिवस्कृणोत्वयं मृधः पुर ऽ एतु प्रभिन्दन् ।

अयं वाजाञ्जयतु वाजसातावयꣳ शत्रूञ्जयतु जर्हृषाणः स्वाहा ॥ ३७ ॥

उरु विष्णो विक्रमस्वोरु क्षयाय नस्कृधि ।
घृतं घृतयोने पिब प्रप्र यज्ञपतिं तिर स्वाहा ॥ ३८ ॥

देव सवितरेष ते सोमस्तꣳ रक्षस्व मा त्वा दभन् ।
एतत्त्वं देव सोम देवो देवाँ२ऽ उपागा ऽइदमहं मनुष्यान्त्सह रायस्पोषेण स्वाहा
निर्वरुणस्य पाशान्मुच्ये ॥ ३९ ॥

अग्ने व्रतपास्त्वे व्रतपा या तव तनूर्मय्यभूदेषा सा त्वयि यो मम तनूस्त्वय्यभूदियꣳ सा
मयि । यथायथं नौ व्रतपते व्रतान्यनु मे दीक्षां दीक्षापतिरमꣳस्तानु तपस्तपस्पतिः॥४०॥

उरु विष्णो विक्रमस्वोरु क्षयाय नस्कृधि ।
घृतं घृतयोने पिब प्रप्र यज्ञपतिं तिर स्वाहा ॥ ४१ ॥

अत्यन्याँ२ऽ अगां नान्याँ२ऽ उपागामर्वाक् त्वा परेभ्योऽविदं परोऽवरेभ्यः ।
तं त्वा जुषामहे देव वनस्पते देवयज्यायै देवास्त्वा देवयज्यायै जुषन्तां विष्णवे त्वा ।
ओषधे त्रायस्व स्वधिते मैनꣳ हिꣳसीः ॥ ४२ ॥

द्यां मा लेखीरन्तरिक्षं मा हिꣳसीः पृथिव्या सम्भव ।
अयꣳ हि त्वा स्वधितिस्तेतिजानः प्रणिनाय महते सौभगाय ।
अतस्त्वं देव वनस्पते शतवल्शो विरोह सहस्रवल्शा वि वयꣳ रुहेम ॥ ४३ ॥

इति पञ्चमोऽध्यायः ।

अथ षष्ठोऽध्यायः ।

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् । आददे नार्यसीदमहꣳ
रक्षसां ग्रीवा ऽअपिकृन्तामि । यवोऽसि यवयास्मद्द्वेषो यवयारातीर्दिवे त्वान्तरिक्षाय
त्वा पृथिव्यै त्वा शुन्धन्ताँल्लोकाः पितृषदनाः पितृषदनमसि ॥ १ ॥

अग्रेणीरसि स्वावेश ऽउन्नेतॄणामेतस्य वित्तादधि त्वा स्थास्यति देवस्त्वा सविता
मध्वानक्तु सुपिप्पलाभ्यस्त्वौषधीभ्यः । द्यामग्रेणास्पृक्ष ऽआन्तरिक्षं मध्येनाप्राः
पृथिवीमुपरेणादृꣳहीः ॥ २ ॥

या ते धामान्युश्मसि गमध्यै यत्र गावो भूरिशृङ्गा ऽ अयासः ।
अत्राह तदुरुगायस्य विष्णोः परमं पदमवभारि भूरि । ब्रह्मवनि त्वा क्षत्रवनि
रायस्पोषवनि पर्यूहामि । ब्रह्म दृꣳह, क्षत्रं दृꣳहायुर्दृꣳह प्रजां दृꣳह ॥ ३ ॥

विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे । इन्द्रस्य युज्यः सखा ॥ ४ ॥

तद्विष्णोः परमं पदꣳ सदा पश्यन्ति सूरयः । दिवीव चक्षुराततम् ॥ ५ ॥

परिवीरसि परि त्वा दैवीर्विशो व्ययन्तां परीमं यजमानꣳ रायो मनुष्याणाम् ।
दिवः सूनुरस्येष ते पृथिव्याँल्लोक ऽ आरण्यस्ते पशुः ॥ ६ ॥

उपावीरस्युप देवान्दैवीर्विशः प्रागुरुशिजो वह्नितमान् ।
देव त्वष्टर्वसु रम हव्या ते स्वदन्ताम् ॥ ७ ॥

रेवती रमध्वं बृहस्पते धारया वसूनि ।
ऋतस्य त्वा देवहविः पाशेन प्रतिमुञ्चामि धर्षा मानुषः ॥ ८ ॥

देवस्य त्वा सवितुः प्रसवे ऽ श्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् ।
अग्नीषोमाभ्यां जुष्टं नियुनज्मि । अद्भ्यस्त्वौषधीभ्योऽनु त्वा माता मन्यतामनु
पितानु भ्राता सगर्भ्योऽनु सखा सयूथ्यः । अग्नीषोमाभ्यां त्वा जुष्टं प्रोक्षामि॥९॥

अपां पेरुरस्यापो देवीः स्वदन्तु स्वात्तं चित्सद्देवहविः ।
सं ते प्राणो वातेन गच्छताꣳ समङ्गानि यजत्रैः सं यज्ञपतिराशिषा ॥ १० ॥

घृतेनाक्तौ पशूँस्त्रायेथाꣳ रेवति यजमाने प्रियं धाऽआविश । उरोरन्तरिक्षात्सजूर्देवेन वातेनास्य हविषस्त्मना यज समस्य तन्वा भव । वर्षो वर्षीयसि यज्ञे यज्ञपतिं धाः स्वाहा देवेभ्यो देवेभ्यः स्वाहा ॥ ११ ॥

माहिर्भूर्मा पृदाकुर्नमस्त ऽ आतानानर्वा प्रेहि ।
घृतस्य कुल्या ऽ उप ऽ ऋतस्य पथ्या ऽ अनु ॥ १२ ॥

देवीरापः शुद्धा वोढ्वꣳ सुपरिविष्टा देवेषु सुपरिविष्टा वयं परिवेष्टारो भूयास्म ॥१३॥

वाचं ते शुन्धामि प्राणं ते शुन्धामि चक्षुस्ते शुन्धामि श्रोत्रं ते शुन्धामि नाभिं ते
शुन्धामि मेढ्रं ते शुन्धामि पायुं ते शुन्धामि चरित्राँस्ते शुन्धामि ॥ १४ ॥

मनस्त ऽआप्यायतां वाक्त ऽआप्यायतां प्राणस्त ऽआप्यायतां चक्षुस्त ऽआप्यायताᳫं श्रोत्रं त ऽआप्यायताम् । यत्ते क्रूरं यदास्थितं तत्त ऽआप्यायतां निष्ट्यायतां तत्ते शुध्यतु शमहोभ्यः । ओषधे त्रायस्व स्वधिते मैनᳫं हिᳫंसीः ॥ १५ ॥

रक्षसां भागोऽसि निरस्तᳫं रक्ष ऽइदमहᳫं रक्षोऽभितिष्ठामीदमहᳫं रक्षोऽवबाध ऽइदमहᳫं रक्षोऽधमं तमो नयामि। घृतेन द्यावापृथिवी प्रोर्णुवाथां वायो वे स्तोकानामग्निराज्यस्य वेतु स्वाहा स्वाहाकृते ऽऊर्ध्वनभसं मारुतं गच्छतम् ॥ १६ ॥

इदमापः प्रवहतावद्यं च मलं च यत् । यच्चाभिदुद्रोहानृतं यच्च शेपे ऽअभीरुणम् ।
आपो मा तस्मादेनसः पवमानश्च मुञ्चतु ॥ १७ ॥

सं ते मनो मनसा सं प्राणः प्राणेन गच्छताम् । रेडस्यग्निष्ट्वा श्रीणात्वापस्त्वा समरिणन्वातस्य त्वा ध्राज्यै पूष्णो रᳫंह्या ऽऊष्मणो व्यथिषत्प्रयुतं द्वेषः ॥ १८ ॥

घृतं घृतपावानः पिबत वसां वसापावानः पिबतान्तरिक्षस्य हविरसि स्वाहा ।
दिशः प्रदिश ऽआदिशो विदिश ऽउद्दिशो दिग्भ्यः स्वाहा ॥ १९ ॥

ऐन्द्रः प्राणो ऽअङ्गे ऽअङ्गे निदीध्यदैन्द्र ऽउदानो ऽअङ्गे ऽअङ्गे निधीतः ।
देव त्वष्टर्भूरि ते सᳫं समेतु सलक्ष्मा यद्विषुरूपं भवाति ।
देवत्रा यन्तमवसे सखायोऽनु त्वा माता पितरो मदन्तु ॥ २० ॥

समुद्रं गच्छ स्वाहान्तरिक्षं गच्छ स्वाहा देवᳫं सवितारं गच्छ स्वाहा मित्रावरुणौ गच्छ स्वाहाहोरात्रे गच्छ स्वाहा छन्दाᳫंसि गच्छ स्वाहा द्यावापृथिवी गच्छ स्वाहा यज्ञं गच्छ स्वाहा सोमं गच्छ स्वाहा दिव्यं नभो गच्छ स्वाहाग्निं वैश्वानरं गच्छ स्वाहा मनो मे हार्दि यच्छ दिवं ते धूमो गच्छतु स्वर्ज्योतिः पृथिवीं भस्मनापृण स्वाहा ॥२१ ॥

मापो मौषधीर्हिᳫंसीर्धाम्नो धाम्नो राजँस्ततो वरुण नो मुञ्च ।
यदाहुरघ्न्या ऽइति वरुणेति शपामहे ततो वरुण नो मुञ्च ।
सुमित्रिया न ऽआप ऽओषधयः सन्तु दुर्मित्रियास्तस्मै सन्तु
यो ऽस्मान्द्वेष्टि यं च वयं द्विष्मः ॥ २२ ॥

हविष्मतीरिमा ऽआपो हविष्माँ २ऽ आविवासति ।
हविष्मान्देवो ऽअध्वरो हविष्माँ २ऽ अस्तु सूर्यः ॥ २३ ॥

अग्नेर्वोऽपन्नगृहस्य सदसि सादयामीन्द्राग्न्योर्भागधेयी स्थ मित्रावरुणयोर्भागधेयी
स्थ विश्वेषां देवानां भागधेयी स्थ । अमूर्या ऽउप सूर्ये याभिर्वा सूर्यः सह ।
ता नो हिन्वन्त्वध्वरम् ॥ २४ ॥

हृदे त्वा मनसे त्वा दिवे त्वा सूर्याय त्वा । ऊर्ध्वमिममध्वरं दिवि देवेषु होत्रा यच्छ ॥ २५ ॥

सोम राजन्विश्वास्त्वं प्रजा ऽउपावरोह विश्वास्त्वां प्रजा ऽउपावरोहन्तु ।
शृणोत्वग्निः समिधा हवं मे शृण्वन्त्वापो धिषणाश्च देवीः ।
श्रोता ग्रावाणो विदुषो न यज्ञꣳ शृणोतु देवः सविता हवं मे स्वाहा ॥ २६ ॥

देवीरापो ऽअपां नपाद्यो व ऽऊर्मिर्हविष्य ऽइन्द्रियावान् मदिन्तमः ।
तं देवेभ्यो देवत्रा दत्त शुक्रपेभ्यो येषां भाग स्थ स्वाहा ॥ २७ ॥

कार्षिरसि समुद्रस्य त्वा क्षित्या ऽउन्नयामि । समापो ऽअद्भिरग्मत समोषधीभिरोषधीः २८

यमग्ने पृत्सु मर्त्यमवा वाजेषु यं जुनाः । स यन्ता शश्वतीरिषः स्वाहा ॥ २९ ॥

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् ।
आददे रावासि गभीरमिममध्वरं कृधीन्द्राय सुषूतमम् ।
उत्तमेन पविनोर्जस्वन्तं मधुमन्तं पयस्वन्तं निग्राभ्या स्थ देवश्रुतस्तर्पयत मा ॥ ३० ॥

मनो मे तर्पयत वाचं मे तर्पयत प्राणं मे तर्पयत चक्षुर्मे तर्पयत श्रोत्रं मे तर्पयतात्मानं
मे तर्पयत प्रजां मे तर्पयत पशून्मे तर्पयत गणान्मे तर्पयत गणा मे मा वितृषन् ॥३१॥

इन्द्राय त्वा वसुमते रुद्रवत ऽइन्द्राय त्वादित्यवत ऽइन्द्राय त्वाभिमातिघ्ने ।
श्येनाय त्वा सोमभृतेऽग्नये त्वा रायस्पोषदे ॥ ३२ ॥

यत्ते सोम दिवि ज्योतिर्यत्पृथिव्यां यदुरावन्तरिक्षे ।
तेनास्मै यजमानायोरु राये कृध्यधि दात्रे वोचः ॥ ३३ ॥

श्वात्रा स्थ वृत्रतुरो राधोगूर्ताऽअमृतस्य पत्नीः ।
ता देवीर्देवत्रेमं यज्ञं नयतोपहूताः सोमस्य पिबत ॥ ३४ ॥

मा भेर्मा संविक्था ऽऊर्जं धत्स्व धिषणे वीड्वी सती वीडयेथामूर्जं दधाथाम् ।
पाप्मा हतो न सोमः ॥ ३५ ॥

प्रागपागुदगधराक्सर्वतस्त्वा दिश ऽआधावन्तु । अम्ब निष्पर समरीर्विदाम् ॥३६॥

त्वमङ्ग प्रशंᳬसिषो देवः शविष्ठ मर्त्यम् ।
न त्वदन्यो मघवन्नस्ति मर्डितेन्द्र ब्रवीमि ते वचः ॥ ३७ ॥

॥ इति षष्ठोऽध्यायः ॥

अथ सप्तमोऽध्यायः ।

वाचस्पतये पवस्व वृष्णो ऽअंᳬशुभ्यां गभस्तिपूतः ।
देवो देवेभ्यः पवस्व येषां भागोऽसि ॥ १ ॥

मधुमतीर्न ऽइषस्कृधि यत्ते सोमादाभ्यं नाम जागृवि तस्मै ते सोम
सोमाय स्वाहा स्वाहोर्वन्तरिक्षमन्वेमि ॥ २ ॥

स्वाङ्कृतोऽसि विश्वेभ्य ऽइन्द्रियेभ्यो दिव्येभ्यः पार्थिवेभ्यो मनस्त्वाष्टु स्वाहा
त्वा सुभव सूर्याय देवेभ्यस्त्वा मरीचिपेभ्यो देवांᳬशो यस्मै त्वेडे तत्सत्यमुपरिप्रुता
भङ्गेन हतो ऽसौ फट् प्राणाय त्वा व्यानाय त्वा ॥ ३ ॥

उपयामगृहीतो ऽस्यन्तर्यच्छ मघवन् पाहि सोमम् । उरुष्य राय ऽएषो यजस्व ॥ ४ ॥

अन्तस्ते द्यावापृथिवी दधाम्यन्तर्दधाम्युर्वन्तरिक्षम् ।
सजूर्देवेभिरवरैः परैश्चान्तर्यामे मघवन् मादयस्व ॥ ५ ॥

स्वाङ्कृतोऽसि विश्वेभ्य ऽइन्द्रियेभ्यो दिव्येभ्यः पार्थिवेभ्यो मनस्त्वाष्टु स्वाहा
त्वा सुभव सूर्याय देवेभ्यस्त्वा मरीचिपेभ्य ऽउदानाय त्वा ॥ ६ ॥

आ वायो भूष शुचिपा ऽउप नः सहस्रं ते नियुतो विश्ववार ।
उपो ते ऽअन्धो मद्यमयामि यस्य देव दधिषे पूर्वपेयं वायवे त्वा ॥ ७ ॥

इन्द्रवायू ऽइमे सुता ऽउप प्रयोभिरागतम् । इन्दवो वामुशन्ति हि ।
उपयामगृहीतोऽसि वायव ऽइन्द्रवायुभ्यां त्वैष ते योनिः सजोषोभ्यां त्वा ॥ ८ ॥

अयं वां मित्रावरुणा सुतः सोम ऽऋतावृधा । ममेदिह श्रुतंᳬ हवम् ।
उपयामगृहीतोऽसि मित्रावरुणाभ्यां त्वा ॥ ९ ॥

राया व॒यᳪ᳭ स॑सवा॒ᳪ᳭सो॑ मदेम ह॒व्येन॑ दे॒वा यव॑सेन॒ गावः॑ । तां धे॒नुं मि॑त्रावरुणा
यु॒वं नो॑ वि॒श्वाहा॑ धत्त॒मन॑पस्फुरन्तीमे॒ष ते॒ योनि॑र्ऋ॒तायु॒भ्यां॑ त्वा ॥ १० ॥

या वां॒ कशा॒ मधु॑म॒त्यश्वि॑ना सू॒नृता॑वती । तया॑ य॒ज्ञं मि॑मिक्षतम् ।
उ॒प॒या॒मगृ॑हीतोऽस्य॒श्विभ्यां॑ त्वै॒ष ते॒ योनि॑र्माध्वी॒भ्यां॑ त्वा ॥ ११ ॥

तं प्र॒त्नथा॑ पू॒र्वथा॑ वि॒श्वथे॒मथा॑ ज्ये॒ष्ठता॑तिं ब॒र्हि॒षद॑ᳪ᳭ स्व॒र्विद॑म् ।
प्र॒ती॒ची॒नं वृ॒जनं॑ दोहसे॒ धुनि॑मा॒शुं जय॑न्त॒मनु॒ यासु॒ वर्ध॑से ।
उ॒प॒या॒मगृ॑हीतोऽसि॒ शण्डा॑य त्वै॒ष ते॒ योनि॑र्वी॒रतां॑ पा॒ह्यप॑मृष्टः॒ शण्डो॑ दे॒वास्त्वा॑
शु॒क्र॒पाः प्रण॑य॒न्त्वना॑धृष्टासि ॥ १२ ॥

सु॒वीरो॑ वी॒रान् प्र॑ज॒नय॒न् परी॑ह्य॒भि रा॒यस्पोषे॑ण॒ यज॑मानम् ।
स॒ञ्ज॒ग्मा॒नो दि॒वा पृ॑थि॒व्या शु॒क्रः शु॒क्रशो॑चिषा॒ निर॑स्त॒ः शण्डः॑ शु॒क्रस्या॑धि॒ष्ठान॑मसि १३॥

अच्छि॑न्नस्य ते देव सोम सु॒वीर्य॑स्य रा॒यस्पोष॑स्य दद्वि॒तारः॑ स्याम ।
सा प्र॑थ॒मा सँस्कृ॑तिर्वि॒श्ववा॑रा॒ स प्र॑थ॒मो वरु॑णो मि॒त्रो ऽअ॒ग्निः ॥ १४ ॥

स प्र॑थ॒मो बृ॒हस्पति॑श्चिकि॒त्वाँस्तस्मा॒ ऽइन्द्रा॑य सु॒तमा जु॑होत॒ स्वाहा॑ ।
तृ॒म्पन्तु॒ होत्रा॒ मध्वो॒ याः स्वि॑ष्टा॒ याः सुप्री॑ता॒ः सुहु॑ता॒ यत्स्वाहाया॑ड॒ग्नीत् ॥ १५ ॥

अ॒यं वे॒नश्चो॑दय॒त्पृश्नि॑गर्भा॒ ज्योति॑र्जरायू॒ रज॑सो वि॒माने॑ ।
इ॒मम॒पाᳪ᳭ स॑ङ्ग॒मे सूर्य॑स्य॒ शिशुं॒ न विप्रा॑ म॒तिभी॑ रिहन्ति ।
उ॒प॒या॒मगृ॑हीतोऽसि॒ मर्का॑य त्वा ॥ १६ ॥

मनो॒ न येषु॒ हव॑नेषु ति॒ग्मं विपः॒ शच्या॑ वनु॒थो द्रव॑न्ता ।
आ यः शर्या॑भिस्तुविनृ॒म्णो ऽअ॒स्याश्री॑णीता॒दिशं॒ गभ॑स्तावे॒ष ते॒ योनिः॑ प्र॒जाः
पा॒ह्यप॑मृष्टो॒ मर्को॑ दे॒वास्त्वा॑ मन्थि॒पाः प्रण॑य॒न्त्वना॑धृष्टासि ॥ १७ ॥

सु॒प्र॒जाः प्र॒जाः प्र॑ज॒नय॒न् परी॑ह्य॒भि रा॒यस्पोषे॑ण॒ यज॑मानम् ।
स॒ञ्ज॒ग्मा॒नो दि॒वा पृ॑थि॒व्या म॒न्थी म॒न्थिशो॑चिषा॒ निर॑स्तो॒ मर्को॑ म॒न्थिनो॑ऽधि॒ष्ठान॑मसि १८॥

ये दे॑वासो दि॒व्येका॑दश॒ स्थ पृ॑थि॒व्यामध्येका॑दश॒ स्थ ।
अ॒प्सु॒क्षितो॑ महि॒नैका॑दश॒ स्थ ते दे॑वासो य॒ज्ञमि॒मं जु॑षध्वम् ॥ १९ ॥

उपयामगृहीतोऽस्याग्रयणोऽसि स्वाग्रयणः ।
पाहि यज्ञं पाहि यज्ञपतिं विष्णुस्त्वामिन्द्रियेण पातु विष्णुं त्वं पाह्यभि सवनानि पाहि ।।२०।।

सोमः पवते सोमः पवतेऽस्मै ब्रह्मणेऽस्मै क्षत्रायास्मै सुन्वते यजमानाय पवतऽ इषऽऊर्जे पवतेऽद्भ्यऽओषधीभ्यः पवते द्यावापृथिवीभ्यां पवते सुभूताय पवते विश्वेभ्यस्त्वा देवेभ्यऽएष ते योनिर्विश्वेभ्यस्त्वा देवेभ्यः ।। २१ ।।

उपयामगृहीतोऽसीन्द्राय त्वा बृहद्वते वयस्वतऽउक्थाव्यं गृह्णामि । यत्तऽइन्द्र बृहद्वयस्तस्मै त्वा विष्णवे त्वैष ते योनिरुक्थेभ्यस्त्वा देवेभ्यस्त्वा देवाव्यं यज्ञस्यायुषे गृह्णामि ।। २२ ।।

मित्रावरुणाभ्यां त्वा देवाव्यं यज्ञस्यायुषे गृह्णामीन्द्राय त्वा देवाव्यं यज्ञस्यायुषे गृह्णामीन्द्राग्निभ्यां त्वा देवाव्यं यज्ञस्यायुषे गृह्णामीन्द्रावरुणाभ्यां त्वा देवाव्यं यज्ञस्यायुषे गृह्णामीन्द्राबृहस्पतिभ्यां त्वा देवाव्यं यज्ञस्यायुषे गृह्णामीन्द्राविष्णुभ्यां त्वा देवाव्यं यज्ञस्यायुषे गृह्णामि ।। २३ ।।

मूर्धानं दिवोऽअरतिं पृथिव्या वैश्वानरमृतऽआ जातमग्निम् ।
कविꣳ सम्राजमतिथिं जनानामासन्ना पात्रं जनयन्त देवाः ।। २४ ।।

उपयामगृहीतोऽसि ध्रुवोऽसि ध्रुवक्षितिर्ध्रुवाणां ध्रुवतमोऽच्युतानामच्युतक्षित्तमऽएष ते योनिर्वैश्वानराय त्वा । ध्रुवं ध्रुवेण मनसा वाचा सोममवनयामि । अथा नऽइन्द्रऽइद्विशोऽसपत्नाः समनसस्करत् ।। २५ ।।

यस्ते द्रप्स स्कन्दति यस्तेऽअꣳशुर्ग्रावच्युतो धिषणयोरुपस्थात् ।
अध्वर्योर्वा परि वा यः पवित्रात्तं ते जुहोमि मनसा वषट्कृतꣳ
स्वाहा देवानामुत्क्रमणमसि ।। २६ ।।

प्राणाय मे वर्चोदा वर्चसे पवस्व व्यानाय मे वर्चोदा वर्चसे पवस्वोदानाय मे वर्चोदा वर्चसे पवस्व वाचे मे वर्चोदा वर्चसे पवस्व क्रतूदक्षाभ्यां मे वर्चोदा वर्चसे पवस्व श्रोत्राय मे वर्चोदा वर्चसे पवस्व चक्षुर्भ्यां मे वर्चोदसौ वर्चसे पवेथाम् ।। २७ ।।

आत्मने मे वर्चोदा वर्चसे पवस्वौजसे मे वर्चोदा वर्चसे पवस्वायुषे मे वर्चोदा वर्चसे पवस्व विश्वाभ्यो मे प्रजाभ्यो वर्चोदसौ वर्चसे पवेथाम् ।। २८ ।।

कोऽसि कतमोऽसि कस्यासि को नामासि ।
यस्य ते नामामन्महि यं त्वा सोमेनातीतृपाम ।
भूर्भुवः स्वः सुप्रजाः प्रजाभिः स्याᳬ सुवीरो वीरैः सुपोषः पोषैः ॥ २९ ॥

उपयामगृहीतोऽसि मधवे त्वोपयामगृहीतोऽसि माधवाय त्वोपयामगृहीतोऽसि शुक्राय त्वोपयामगृहीतोऽसि शुचये त्वोपयामगृहीतोऽसि नभसे त्वोपयामगृहीतोऽसि नभस्याय त्वोपयामगृहीतोऽसीषे त्वोपयामगृहीतोऽस्यूर्जे त्वोपयामगृहीतोऽसि सहसे त्वोपयामगृहीतोऽसि सहस्याय त्वोपयामगृहीतोऽसि तपसे त्वोपयामगृहीतोऽसि तपस्याय त्वोपयामगृहीतोऽस्यᳬहसस्पतये त्वा ॥ ३० ॥

इन्द्राग्नी ऽआगतᳬ सुतं गीर्भिर्नभो वरेण्यम् । अस्य पातं धियेषिता ।
उपयामगृहीतोऽसीन्द्राग्निभ्यां त्वैष ते योनिरिन्द्राग्निभ्यां त्वा ॥ ३१ ॥

आ घा ये ऽअग्निमिन्धते स्तृणन्ति बर्हिरानुषक् । येषामिन्द्रो युवा सखा ।
उपयामगृहीतोऽस्यग्नीन्द्राभ्यां त्वैष ते योनिरग्नीन्द्राभ्यां त्वा ॥ ३२ ॥

ओमासश्चर्षणीधृतो विश्वे देवास ऽआगत । दाश्वाᳬसो दाशुषः सुतम् ।
उपयामगृहीतोऽसि विश्वेभ्यस्त्वा देवेभ्य ऽएष ते योनिर्विश्वेभ्यस्त्वा देवेभ्यः ॥३३॥

विश्वे देवास ऽआगत शृणुता म ऽइमᳬ हवम् । एदं बर्हिर्निषीदत ।
उपयामगृहीतोऽसि विश्वेभ्यस्त्वा देवेभ्य ऽएष ते योनिर्विश्वेभ्यस्त्वा देवेभ्यः ॥३४॥

इन्द्र मरुत्व ऽइह पाहि सोमं यथा शार्याते ऽअपिबः सुतस्य । तव प्रणीती तव शूर शर्मन्नाविवासन्ति कवयः सुयज्ञाः । उपयामगृहीतोऽसीन्द्राय त्वा मरुत्वत ऽएष ते योनिरिन्द्राय त्वा मरुत्वते ॥ ३५ ॥

मरुत्वन्तं वृषभं वावृधानमकवारिं दिव्यᳬ शासमिन्द्रम् ।
विश्वासाहमवसे नूतनायोग्रᳬ सहोदामिह तᳬ हुवेम ।
उपयामगृहीतोऽसीन्द्राय त्वा मरुत्वत ऽएष ते योनिरिन्द्राय त्वा मरुत्वते ।
उपयामगृहीतोऽसि मरुतां त्वौजसे ॥ ३६ ॥

सजोषा ऽइन्द्र सगणो मरुद्भिः सोमं पिब वृत्रहा शूर विद्वान् ।
जहि शत्रूँ१ऽ रप मृधो नुदस्वाथाभयं कृणुहि विश्वतो नः ।

उपयामगृहीतोऽसीन्द्राय त्वा मरुत्वत ऽ एष ते योनिरिन्द्राय त्वा मरुत्वते ॥३७॥

मरुत्वाँ२ऽ इन्द्र वृषभो रणाय पिबा सोममनुष्वधं मदाय ।
आसिञ्चस्व जठरे मध्व ऽ ऊर्मिं त्वꣳ राजासि प्रतिपत्सुतानाम् ।
उपयामगृहीतोऽसीन्द्राय त्वा मरुत्वत ऽ एष ते योनिरिन्द्राय त्वा मरुत्वते ॥३८॥

महाँ२ऽ इन्द्रो नृवदा चर्षणिप्रा ऽ उत द्विबर्हा ऽ अमिनः सहोभिः ।
अस्मद्र्यग्वावृधे वीर्यायोरुः पृथुः सुकृतः कर्तृभिर्भूत् ।
उपयामगृहीतोऽसि महेन्द्राय त्वैष ते योनिर्महेन्द्राय त्वा ॥ ३९ ॥

महाँ२ऽ इन्द्रो य ऽ ओजसा पर्जन्यो वृष्टिमाँ२ ऽ इव । स्तोमैर्वत्सस्य वावृधे ।
उपयामगृहीतोऽसि महेन्द्राय त्वैष ते योनिर्महेन्द्राय त्वा ॥ ४० ॥

उदु त्यं जातवेदसं देवं वहन्ति केतवः । दृशे विश्वाय सूर्यꣳ स्वाहा ॥ ४१ ॥

चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः ।
आप्रा द्यावापृथिवी ऽ अन्तरिक्षꣳ सूर्य ऽ आत्मा जगतस्तस्थुषश्च स्वाहा ॥ ४२ ॥

अग्ने नय सुपथा राये ऽ अस्मान्विश्वानि देव वयुनानि विद्वान् ।
युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नमऽउक्तिं विधेम स्वाहा ॥ ४३ ॥

अयं नो ऽ अग्निर्वरिवस्कृणोत्वयं मृधः पुर ऽ एतु प्रभिन्दन् ।
अयं वाजाञ्जयतु वाजसातावयꣳ शत्रूञ्जयतु जर्हृषाणः स्वाहा ॥ ४४ ॥

रूपेण वो रूपमभ्यागां तुथो वो विश्ववेदा विभजतु ।
ऋतस्य पथा प्रेत चन्द्रदक्षिणा वि स्वः पश्य व्यन्तरिक्षं यतस्व सदस्यैः ॥ ४५ ॥

ब्राह्मणमद्य विदेयं पितृमन्तं पैतृमत्यमृषिमार्षेयꣳ सुधातुदक्षिणम् ।
अस्मद्राता देवत्रा गच्छत प्रदातारमाविशत ॥ ४६ ॥

अग्नये त्वा मह्यं वरुणो ददातु सोऽमृतत्वमशीयायुर्दात्र ऽ एधि मयो मह्यं प्रतिग्रहीत्रे रुद्राय त्वा मह्यं वरुणो ददातु सोऽमृतत्वमशीय प्राणो दात्र ऽ एधि वयो मह्यं प्रतिग्रहीत्रे बृहस्पतये त्वा मह्यं वरुणो ददातु सो ऽ मृतत्वमशीय त्वग्दात्र ऽ एधि मयो मह्यं प्रतिग्रहीत्रे यमाय त्वा मह्यं वरुणो ददातु सो ऽ मृतत्वमशीय हयो दात्रऽ एधि वयो मह्यं प्रतिग्रहीत्रे ॥ ४७ ॥

कोऽदात्कस्मा ऽ अदात्कामोऽदात्कामायादात् ।
कामो दाता कामः प्रतिग्रहीता कामैतत्ते ॥ ४८ ॥

इति सप्तमोऽध्यायः ।

अथाऽष्टमोऽध्यायः ।

उपयामगृहीतोऽस्यादित्येभ्यस्त्वा ।
विष्ण ऽ उरुगायैष ते सोमस्तꣳ रक्षस्व मा त्वा दभन् ॥ १ ॥

कदा चन स्तरीरसि नेन्द्र सश्चसि दाशुषे ।
उपोपेन्नु मघवन्भूय ऽ इन्नु ते दानं देवस्य पृच्यत ऽ आदित्येभ्यस्त्वा ॥ २ ॥

कदा चन प्रयुच्छस्युभे निपासि जन्मनी ।
तुरीयादित्य सवनं त ऽ इन्द्रियमातस्थावमृतं दिव्यादित्येभ्यस्त्वा ॥ ३ ॥

यज्ञो देवानां प्रत्येति सुम्नमादित्यासो भवता मृडयन्तः ।
आ वोऽर्वाची सुमतिर्ववृत्यादꣳहोश्चिद्या वरिवोवित्तरासदादित्येभ्यस्त्वा ॥ ४ ॥

विवस्वन्नादित्यैष ते सोमपीथस्तस्मिन् मत्स्व ।
श्रदस्मै नरो वचसे दधातन यदाशीर्दा दम्पती वाममश्नुतः ।
पुमान् पुत्रो जायते विन्दते वस्वधा विश्वाहारप ऽ एधते गृहे ॥ ५॥

वाममद्य सवितर्वाममु श्वो दिवे दिवे वाममस्मभ्यꣳ सावीः ।
वामस्य हि क्षयस्य देव भूरेरया धिया वामभाजः स्याम ॥ ६ ॥

उपयामगृहीतोऽसि सावित्रोऽसि चनोधाश्चनोधा ऽ असि चनो मयि धेहि ।
जिन्व यज्ञं जिन्व यज्ञपतिं भगाय देवाय त्वा सवित्रे ॥ ७ ॥

उपयामगृहीतोऽसि सुशर्मासि सुप्रतिष्ठानो बृहदुक्षाय नमः ।
विश्वेभ्यस्त्वा देवेभ्य ऽ एष ते योनिर्विश्वेभ्यस्त्वा देवेभ्यः ॥ ८ ॥

उपयामगृहीतोऽसि बृहस्पतिसुतस्य देव सोम त ऽ
इन्दोरिन्द्रियावतः पत्नीवतो ग्रहाँ२ऽ ऋध्यासम् ।

अहं परस्तादहमवस्ताद्यदन्तरिक्षं तदु मे पिताभूत् ।
अहꣳ सूर्यमुभयतो ददर्शाहं देवानां परमं गुहा यत् ॥ ९ ॥

अग्ना३इ पत्नीवन्त्सजूर्देवेन त्वष्ट्रा सोमं पिब स्वाहा ।
प्रजापतिर्वृषासि रेतोधा रेतो मयि धेहि प्रजापतेस्ते वृष्णो रेतोधसो रेतोधामशीय ॥१०

उपयामगृहीतोऽसि हरिरसि हारियोजनो हरिभ्यां त्वा ।
हर्योर्धाना स्थ सहसोमा ऽ इन्द्राय ॥ ११ ॥

यस्ते ऽ अश्वसनिर्भक्षो यो गोसनिस्तस्य त ऽ इष्टयजुष स्तुतस्तोमस्य शस्तोक्थस्यो-
पहूतस्योपहूतो भक्षयामि ॥ १२ ॥

देवकृतस्यैनसोऽवयजनमसि मनुष्यकृतस्यैनसोऽवयजनमसि पितृकृतस्यैनसोऽ-
वयजनमस्यात्मकृतस्यैनसोऽवयजनमस्येनस ऽ एनसोऽवयजनमसि ।
यच्चाहमेनो विद्वाँश्चकार यच्चाविद्वाँस्तस्य सर्वस्यैनसोऽवयजनमसि ॥ १३ ॥

सं वर्चसा पयसा सं तनूभिरगन्महि मनसा सꣳ शिवेन ।
त्वष्टा सुदत्रो विदधातु रायोऽनुमार्ष्टु तन्वो यद्विलिष्टम् ॥ १४ ॥

समिन्द्र णो मनसा नेषि गोभिः सꣳ सूरिभिर्मघवन्त्सꣳ स्वस्त्या ।
सं ब्रह्मणा देवकृतं यदस्ति सं देवानाꣳ सुमतौ यज्ञियानाꣳ स्वाहा ॥ १५ ॥

सं वर्चसा पयसा सं तनूभिरगन्महि मनसा सꣳ शिवेन ।
त्वष्टा सुदत्रो विदधातु रायोऽनुमार्ष्टु तन्वो यद्विलिष्टम् ॥ १६ ॥

धाता रातिः सवितेदं जुषन्तां प्रजापतिर्निधिपा देवो ऽ अग्निः ।
त्वष्टा विष्णुः प्रजया सꣳरराणा यजमानाय द्रविणं दधात स्वाहा ॥ १७ ॥

सुगा वो देवाः सदना ऽ अकर्म य ऽ आजग्मेदꣳ सवनं जुषाणाः ।
भरमाणा वहमाना हवीꣳष्यस्मे धत्त वसवो वसूनि स्वाहा ॥ १८ ॥

याँ२ऽ आवह ऽ उशतो देव देवाँस्तान् प्रेरय स्वे ऽ अग्ने सधस्थे ।
जक्षिवाꣳसः पपिवाꣳसश्च विश्वेऽसुं घर्मꣳ स्वरातिष्ठतानु स्वाहा ॥ १९ ॥

व॒यꣳ हि त्वा॑ प्रय॒ति य॒ज्ञेऽअ॒स्मिन्नग्ने॒ होता॑रमवृणीमही॒ह ।
ऋध॑गया॒ऽऋध॑गु॒ताश॑मिष्ठाः प्रजा॒नन्य॒ज्ञमुप॑याहि वि॒द्वान्त्स्वाहा॑ ॥ २० ॥

देवा॑ गातुविदो गा॒तुं वि॒त्त्वा गा॒तुमि॑त ।
मन॑सस्पत ऽइ॒मं दे॑व य॒ज्ञꣳ स्वाहा॒ वाते॑ धाः ॥ २१ ॥

यज्ञ॑ य॒ज्ञं गच्छ य॒ज्ञप॑तिं गच्छ॒ स्वां योनिं॑ गच्छ॒ स्वाहा॑ ।
ए॒ष ते॑ य॒ज्ञो य॑ज्ञपते स॒हसू॑क्तवाकः॒ सर्व॑वीर॒स्तं जु॑षस्व॒ स्वाहा॑ ॥ २२ ॥

माहि॑र्भूर्मा पृदा॑कुः । उ॒रुꣳ हि राजा॒ वरु॑णश्च॒कार॒ सूर्या॑य॒ पन्था॒मन्वे॑त॒वा ऽउ॑ ।
अ॒पदे॒ पादा॒ प्रति॑धातवेऽकरु॒तापव॒क्ता हृ॑दया॒विध॑श्चित् ।
नमो॒ वरु॑णाया॒भिष्ठि॑तो॒ वरु॑णस्य॒ पाशः॑ ॥ २३ ॥

अ॒ग्नेरनी॑कम॒प ऽआवि॑वेशा॒पां नपा॑त् प्रति॒रक्ष॑न्नसु॒र्य॑म् ।
दमे॑दमे स॒मिधं॑ यक्ष्यग्ने॒ प्रति॑ ते जि॒ह्वा घृ॒तमुच्च॑रण्य॒त् स्वाहा॑ ॥ २४ ॥

स॒मु॒द्रे ते॒ हृद॑यम॒प्स्व॒न्तः सं त्वा॑ विश॒न्त्वोष॑धीरु॒तापः॑ ।
य॒ज्ञस्य॑ त्वा यज्ञपते सू॒क्तोक्तौ॑ नमोवा॒के वि॑धेम॒ यत् स्वाहा॑ ॥ २५ ॥

देवी॑राप ऽए॒ष वो॒ गर्भ॒स्तꣳ सुप्री॑त॒ꣳ सुभृ॑तं बिभृत ।
देव॑ सोमै॒ष ते॑ लो॒कस्तस्मि॒ञ्छं च॒ वक्ष्व॒ परि॑ च वक्ष्व ॥ २६ ॥

अव॑भृथ निचुम्पुण नि॒चेरु॑रसि निचुम्पु॒णः ।
अव॑ दे॒वैर्दे॒वकृ॑त॒मेनो॑ऽयासिष॒मव॒ मर्त्यै॒र्मर्त्य॑कृतं पुरु॒राव्णो॑ देव रि॒षस्पा॑हि ।
दे॒वाना॑ꣳ स॒मिद॑सि ॥ २७ ॥

एज॑तु॒ दश॑मास्यो॒ गर्भो॑ ज॒रायु॑णा स॒ह ।
यथा॒यं वा॒युरेज॑ति॒ यथा॑ समु॒द्र ऽएज॑ति ।
ए॒वायं दश॑मास्यो॒ ऽअस्र॑ज्ज॒रायु॑णा स॒ह ॥ २८ ॥

यस्यै॑ ते य॒ज्ञियो॒ गर्भो॒ यस्यै॒ योनि॑र्हिर॒ण्ययी॑ ।
अङ्गा॒न्यहु॑ता॒ यस्य॒ तं मा॒त्रा सम॑जीगम॒ꣳ स्वाहा॑ ॥ २९ ॥

पु॒रु॒दस्मो॒ विषु॑रूप॒ ऽइन्दु॑र॒न्तर्म॑हि॒मान॑मानञ्ज॒ धीरः॑ ।

एकपदीं द्विपदीं त्रिपदीं चतुष्पदीमष्टापदीं भुवनानु प्रथन्तांᳬ स्वाहा ॥ ३० ॥

मरुतो यस्य हि क्षये पाथा दिवो विमहसः । स सुगोपातमो जनः ॥ ३१ ॥

मही द्यौः पृथिवी च न ऽ इमं यज्ञं मिमिक्षताम् । पिपृतां नो भरीमभिः ॥ ३२ ॥

आतिष्ठ वृत्रहन्रथं युक्ता ते ब्रह्मणा हरी। अर्वाचीनᳬ सु ते मनो ग्रावा कृणोतु वग्नुना।
उपयामगृहीतोऽसीन्द्राय त्वा षोडशिन ऽ एष ते योनिरिन्द्राय त्वा षोडशिने ॥ ३३ ॥

युक्ष्वा हि केशिना हरी वृषणा कक्ष्यप्रा । अथा न ऽ इन्द्र सोमपा गिरामुपश्रुतिं चर ।
उपयामगृहीतोऽसीन्द्राय त्वा षोडशिन ऽ एष ते योनिरिन्द्राय त्वा षोडशिने ॥ ३४ ॥

इन्द्रमिद्धरी वहतोऽप्रतिधृष्टशवसम् । ऋषीणां च स्तुतीरुप यज्ञं च मानुषाणाम् ।
उपयामगृहीतोऽसीन्द्राय त्वा षोडशिन ऽ एष ते योनिन्द्राय त्वा षोडशिने ॥ ३५ ॥

यस्मान्न जातः परो ऽ अन्यो ऽ अस्ति य ऽ आविवेश भुवनानि विश्वा ।
प्रजापतिः प्रजया सᳬरराणस्त्रीणि ज्योतीᳬषि सचते स षोडशी ॥ ३६ ॥

इन्द्रश्च सम्राड् वरुणश्च राजा तौ ते भक्षं चक्रतुरग्र ऽ एतम् ।
तयोरहमनु भक्षं भक्षयामि वाग्देवी जुषाणा सोमस्य तृप्यतु सह प्राणेन स्वाहा ॥ ३७ ॥

अग्ने पवस्व स्वपा ऽ अस्मे वर्चः सुवीर्यम् । दधद्रयिं मयि पोषम् ।
उपयामगृहीतोऽस्यग्नये त्वा वर्चस ऽ एष ते योनिरग्नये त्वा वर्चसे ।
अग्ने वर्चस्विन्वर्चस्वाँस्त्वं देवेष्वसि वर्चस्वानहं मनुष्येषु भूयासम् ॥ ३८ ॥

उत्तिष्ठन्नोजसा सह पीत्वी शिप्रे ऽ अवेपयः । सोममिन्द्र चमू सुतम् ।
उपयामगृहीतोऽसीन्द्राय त्वौजस ऽ एष ते योनिरिन्द्राय त्वौजसे ।
इन्द्रौजिष्ठौजिष्ठस्त्वं देवेष्वस्योजिष्ठोऽहं मनुष्येषु भूयासम् ॥ ३९ ॥

अदृश्रमस्य केतवो वि रश्मयो जनाँ२ऽ अनु । भ्राजन्तो ऽ अग्नयो यथा ।
उपयामगृहीतोऽसि सूर्याय त्वा भ्राजायैष ते योनिः सूर्याय त्वा भ्राजाय ।
सूर्य भ्राजिष्ठ भ्राजिष्ठस्त्वं देवेष्वसि भ्राजिष्ठोऽहं मनुष्येषु भूयासम् ॥ ४० ॥

उदु त्यं जातवेदसं देवं वहन्ति केतवः । दृशे विश्वाय सूर्यम् ।
उपयामगृहीतोऽसि सूर्याय त्वा भ्राजायैष ते योनिः सूर्याय त्वा भ्राजाय ॥ ४१ ॥

आजिघ्र कलशं मह्या त्वा विशन्त्विन्दवः ।
पुनरूर्जा निवर्तस्व सा नः सहस्रं धुक्ष्वोरुधारा पयस्वती पुनर्माविशताद्रयिः ॥ ४२ ॥

इडे रन्ते हव्ये काम्ये चन्द्रे ज्योतेऽदिते सरस्वति महि विश्रुति ।
एता तेऽअघ्न्ये नामानि देवेभ्यो मा सुकृतं ब्रूतात् ॥ ४३ ॥

वि नऽइन्द्र मृधो जहि नीचा यच्छ पृतन्यतः ।
योऽअस्माँ२ऽ अभिदासत्यधरं गमया तमः ।
उपयामगृहीतोऽसीन्द्राय त्वा विमृधऽएष ते योनिरिन्द्राय त्वा विमृधे ॥ ४४ ॥

वाचस्पतिं विश्वकर्माणमूतये मनोजुवं वाजेऽअद्या हुवेम ।
स नो विश्वानि हवनानि जोषद्विश्वशम्भूरवसे साधुकर्मा ।
उपयामगृहीतोऽसीन्द्राय त्वा विश्वकर्मणऽएष ते योनिरिन्द्राय त्वा विश्वकर्मणे ॥ ४५॥

विश्वकर्मन्हविषा वर्धनेन त्रातारमिन्द्रमकृणोरवध्यम् ।
तस्मै विशः समनमन्त पूर्वीरयमुग्रो विहव्यो यथासत् ।
उपयामगृहीतोऽसीन्द्राय त्वा विश्वकर्मणऽएष ते योनिरिन्द्राय त्वा विश्वकर्मणे ॥ ४६ ॥

उपयामगृहीतोऽस्यग्नये त्वा गायत्रछन्दसं गृह्णामीन्द्राय त्वा त्रिष्टुप्छन्दसं गृह्णामि
विश्वेभ्यस्त्वा देवेभ्यो जगच्छन्दसं गृह्णाम्यनुष्टुप्तेऽभिगरः ॥ ४७ ॥

व्रेशीनां त्वा पत्मन्नाधूनोमि कुकूननानां त्वा पत्मन्नाधूनोमि
भन्दनानां त्वा पत्मन्नाधूनोमि मदिन्तमानां त्वा पत्मन्नाधूनोमि
मधुन्तमानां त्वा पत्मन्नाधूनोमि शुक्रं त्वा शुक्रऽआधूनोम्यह्नो
रूपे सूर्यस्य रश्मिषु ॥ ४८ ॥

ककुभꣳ रूपं वृषभस्य रोचते बृहच्छुक्रः शुक्रस्य पुरोगाः सोमः सोमस्य पुरोगाः ।
यत्ते सोमादाभ्यं नाम जागृवि तस्मै त्वा गृह्णामि तस्मै ते सोम सोमाय स्वाहा ॥४९॥

उशिक् त्वं देव सोमाग्नेः प्रियं पाथोऽपीहि वशी त्वं देव सोमेन्द्रस्य प्रियं पाथोऽपी-
ह्यस्मत्सखा त्वं देव सोम विश्वेषां देवानां प्रियं पाथोऽपीहि ॥ ५० ॥

इह रतिरिह रमध्वमिह धृतिरिह स्वधृतिः स्वाहा ।
उपसृजन्धरुणं मात्रे धरुणो मातरं धयन् । रायस्पोषमस्मासु दीधरत् स्वाहा ॥ ५१ ॥

सुत्रस्य ऽ ऋद्धिरस्यगन्म ज्योतिरमृता ऽ अभूम ।
दिवं पृथिव्या ऽ अध्यारुहामाविदाम देवान्त्स्वर्ज्योतिः ॥ ५२ ॥

युवं तमिन्द्रापर्वता पुरोयुधा यो नः पृतन्यादप तं-तमिद्धतं वज्रेण तं-तमिद्धतम् ।
दूरे चत्ताय छन्त्सद्गहनं यदिनक्षत् ।
अस्माकꣳ शत्रून् परि शूर विश्वतो दर्मा दर्षीष्ट विश्वतः ।
भूर्भुवः स्वः सुप्रजाः प्रजाभिः स्याम सुवीरा वीरैः सुपोषाः पोषैः ॥५३ ॥

परमेष्ठ्यभिधीतः प्रजापतिर्वाचि व्याहृतायामन्धो ऽ अच्छेतः
सविता सन्यां विश्वकर्मा दीक्षायां पूषा सोमक्रयण्याम् ॥ ५४ ॥

इन्द्रश्च मरुतश्च क्रयायोपोत्थितोऽसुरः पण्यमानो मित्रः क्रीतो विष्णुः शिपिविष्टऽ उरावासन्नो विष्णुर्नरन्धिषः ॥ ५५ ॥

प्रोह्यमाणः सोम ऽ आगतो वरुण ऽ आसन्द्यामासन्नोऽग्निराग्नीध्र ऽ इन्द्रो हविर्धानेऽथर्वोपावह्रियमाणः ॥ ५६ ॥

विश्वे देवा ऽ अꣳशुषु न्युप्तो विष्णुराप्रीतपा ऽ आप्याय्यमानो यमः सूयमानो विष्णुः सम्भ्रियमाणो वायुः पूयमानः शुक्रः पूतः शुक्रः क्षीरश्रीर्मन्थी सक्तुश्रीः ॥५७॥

विश्वे देवाश्चमसेषून्नीतोऽसुर्होमायोद्यतो रुद्रो हूयमानो वातोऽभ्यावृत्तो नृचक्षाः प्रतिख्यातो भक्षो भक्ष्यमाणः पितरो नाराशꣳसाः ॥ ५८ ॥

सन्नः सिन्धुरवभृथायोद्यतः समुद्रोऽभ्यवह्रियमाणः सलिलः प्रप्लुतो ययोरोजसा स्कभिता रजाꣳसि वीर्येभिर्वीरतमा शविष्ठा। या पत्येते ऽ अप्रतीता सहोभिर्विष्णू ऽ अगन्वरुणा पूर्वहूतौ ॥ ५९ ॥

देवान् दिवमगन्यज्ञस्ततो मा द्रविणमष्टु मनुष्यानन्तरिक्षमगन्यज्ञस्ततो मा द्रविणमष्टु पितॄन् पृथिवीमगन्यज्ञस्ततो मा द्रविणमष्टु यं कं च लोकमगन्यज्ञस्ततो मे भद्रमभूत् ॥ ६० ॥

चतुस्त्रिꣳशत्तन्तवो ये वितत्निरे य ऽ इमं यज्ञꣳ स्वधया ददन्ते ।
तेषां छिन्नꣳ सम्वेतद्दधामि स्वाहा घर्मो ऽ अप्येतु देवान् ॥ ६१ ॥

यज्ञस्य दोहो वितंतः पुरुत्रा सोऽअष्टधा दिवमन्वाततान ।
स यज्ञ धुक्ष्व महि मे प्रजायाᳬं रायस्पोषं विश्वमायुरशीय स्वाहा ॥ ६२ ॥

आपवस्व हिरण्यवदश्ववत्सोम वीरवत् । वाजं गोमन्तमाभर स्वाहा ॥ ६३ ॥

इत्यष्टमोऽध्यायः ।

अथ नवमोऽध्यायः ।

देव सवितः प्रसुव यज्ञं प्रसुव यज्ञपतिं भगाय ।
दिव्यो गन्धर्वः केतपूः केतं नः पुनातु वाचस्पतिर्वाजं नः स्वदतु स्वाहा ॥ १ ॥

ध्रुवसदं त्वा नृषदं मनःसदमुपयामगृहीतोऽसीन्द्राय त्वा जुष्टं गृह्णाम्येष ते योनि-
रिन्द्राय त्वा जुष्टतमम् । अप्सुषदं त्वा घृतसदं व्योमसदमुपयामगृहीतोऽसीन्द्राय
त्वा जुष्टं गृह्णाम्येष ते योनिरिन्द्राय त्वा जुष्टतमम् । पृथिविसदं त्वाऽन्तरिक्षसदं
दिविसदं देवसदं नाकसदमुपयामगृहीतोऽसीन्द्राय त्वा जुष्टं गृह्णाम्येष ते योनिरि-
न्द्राय त्वा जुष्टतमम् ॥ २ ॥

अपाᳬं रसमुद्वयसᳬं सूर्ये सन्तᳬं समाहितम् । अपाᳬं रसस्य यो रसस्तं वो गृह्णाम्यु-
त्तममुपयामगृहीतोऽसीन्द्राय त्वा जुष्टं गृह्णाम्येष ते योनिरिन्द्राय त्वा जुष्टतमम् ॥ ३ ॥

ग्रहाऽऊर्जाहुतयो व्यन्तो विप्राय मतिम् । तेषां विशिप्रियाणां वोऽहमिषमूर्जᳬं स-
मग्रभमुपयामगृहीतोऽसीन्द्राय त्वा जुष्टं गृह्णाम्येष ते योनिरिन्द्राय त्वा जुष्टतमम् ।
सम्पृचौ स्थः सं मा भद्रेण पृङ्क्तं विपृचौ स्थो वि मा पाप्मना पृङ्क्तम् ॥ ४ ॥

इन्द्रस्य वज्रोऽसि वाजसास्त्वयायं वाजᳬं सेत् ।
वाजस्य नु प्रसवे मातरं महीमदितिं नाम वचसा करामहे ।
यस्यामिदं विश्वं भुवनमाविवेश तस्यां नो देवः सविता धर्म साविषत् ॥ ५ ॥

अप्स्वन्तरमृतमप्सु भेषजमपामुत प्रशस्तिष्वश्वा भवत वाजिनः ।
देवीरापो यो वऽऊर्मिः प्रतूर्तिः ककुन्मान् वाजसास्तेनायं वाजᳬं सेत् ॥ ६ ॥

वातो वा मनो वा गन्धर्वाः सप्तविंꣳशतिः ।
तेऽअग्रेऽश्वमयुञ्जँस्तेऽअस्मिञ्जवमादधुः ॥ ७ ॥

वातरꣳहा भव वाजिन्युज्यमानऽइन्द्रस्येव दक्षिणः श्रियैधि ।
युञ्जन्तु त्वा मरुतो विश्ववेदसऽआ ते त्वष्टा पत्सु जवं दधातु ॥ ८ ॥

जवो यस्ते वाजिन्निहितो गुहा यः श्येने परीत्तोऽअचरच्च वाते ।
तेन नो वाजिन् बलवान् बलेन वाजजिच्च भव समने च पारयिष्णुः ।
वाजिनो वाजजितो वाजꣳ सरिष्यन्तो बृहस्पतेर्भागमवजिघ्रत ॥ ९ ॥

देवस्याहꣳ सवितुः सवे सत्यसवसो बृहस्पतेरुत्तमं नाकꣳ रुहेयम् ।
देवस्याहꣳ सवितुः सवे सत्यसवसऽइन्द्रस्योत्तमं नाकꣳ रुहेयम् ।
देवस्याहꣳ सवितुः सवे सत्यप्रसवसो बृहस्पतेरुत्तमं नाकमरुहम् ।
देवस्याहꣳ सवितुः सवे सत्यप्रसवसऽइन्द्रस्योत्तमं नाकमरुहम् ॥ १० ॥

बृहस्पते वाजं जय बृहस्पतये वाचं वदत बृहस्पतिं वाजं जापयत ।
इन्द्र वाजं जयेन्द्राय वाचं वदतेन्द्रं वाजं जापयत ॥ ११ ॥

एषा वः सा सत्या संवागभूद्यया बृहस्पतिं वाजमजीजपताजीजपत बृहस्पतिं वाजं
वनस्पतयो विमुच्यध्वम् । एषा वः सा सत्या संवागभूद्ययेन्द्रं वाजमजीजपताजी-
जपतेन्द्रं वाजं वनस्पतयो विमुच्यध्वम् ॥ १२ ॥

देवस्याहꣳ सवितुः सवे सत्यप्रसवसो बृहस्पतेर्वाजजितो वाजं जेषम् ।
वाजिनो वाजजितोऽध्वन स्कभ्नुवन्तो योजना मिमानाः काष्ठां गच्छत ॥ १३ ॥

एष स्य वाजी क्षिपणिं तुरण्यति ग्रीवायां बद्धोऽअपिकक्षऽआसनि ।
क्रतुं दधिक्राऽअनु सꣳसनिष्यदत्पथामङ्काꣳस्यन्वापनीफणत् स्वाहा ॥ १४ ॥

उत स्मास्य द्रवतस्तुरण्यतः पर्णं न वेरनुवाति प्रगर्धिनः ।
श्येनस्येव ध्रजतोऽअङ्कसं परि दधिक्राव्णः सहोर्जा तरित्रतः स्वाहा ॥ १५ ॥

शं नो भवन्तु वाजिनो हवेषु देवताता मितद्रवः स्वर्काः ।
जम्भयन्तोऽहिं वृकꣳ रक्षाꣳसि सनेम्यस्मद्युयवन्नमीवाः ॥ १६ ॥

ते नोऽअर्वन्तो हवनश्रुतो हवं विश्वे शृण्वन्तु वाजिनो मितद्रवः ।
सहस्रसा मेधसाता सनिष्यवो महो ये धनंᳪ समिथेषु जभ्रिरे ॥ १७ ॥

वाजे-वाजेऽवत वाजिनो नो धनेषु विप्राऽअमृताऽऋतज्ञाः ।
अस्य मध्वः पिबत मादयध्वं तृप्ता यात पथिभिर्देवयानैः ॥ १८ ॥

आ मा वाजस्य प्रसवो जगम्यादेमे द्यावापृथिवी विश्वरूपे ।
आ मा गन्तां पितरा मातरा चा मा सोमोऽअमृतत्वेन गम्यात् ।
वाजिनो वाजजितो वाजᳪ ससृवाᳪसो बृहस्पतेर्भागमवजिघ्रत निमृजानाः ॥१९॥

आपये स्वाहा स्वापये स्वाहापिजाय स्वाहा क्रतवे स्वाहा वसवे स्वाहाहर्पतये स्वाहाह्ने मुग्धाय स्वाहा मुग्धाय वैनᳪशिनाय स्वाहा विनᳪशिनऽआन्त्यायनाय स्वाहान्त्याय भौवनाय स्वाहा भुवनस्य पतये स्वाहाधिपतये स्वाहा ॥ २० ॥

आयुर्यज्ञेन कल्पतां प्राणो यज्ञेन कल्पतां चक्षुर्यज्ञेन कल्पताᳪ श्रोत्रं यज्ञेन कल्पतां पृष्ठं यज्ञेन कल्पतां यज्ञो यज्ञेन कल्पताम् । प्रजापतेः प्रजाऽअभूम स्वर्देवाऽअगन्मामृताऽअभूम ॥ २१ ॥

अस्मे वोऽअस्त्विन्द्रियमस्मे नृम्णमुत क्रतुरस्मे वर्चाᳪसि सन्तु वः ।
नमो मात्रे पृथिव्यै नमो मात्रे पृथिव्याऽइयं ते राड्यन्तासि यमनो ध्रुवोऽसि धरुणः ।
कृष्यै त्वा क्षेमाय त्वा रय्यै त्वा पोषाय त्वा ॥ २२ ॥

वाजस्येमं प्रसवः सुषुवेऽग्रे सोमᳪ राजानमोषधीष्वप्सु ।
ताऽअस्मभ्यं मधुमतीर्भवन्तु वयᳪ राष्ट्रे जागृयाम पुरोहिताः स्वाहा ॥ २३ ॥

वाजस्येमां प्रसवः शिश्रिये दिवमिमा च विश्वा भुवनानि सम्राट् ।
अदित्सन्तं दापयति प्रजानन्त्स नो रयिᳪ सर्ववीरं नियच्छतु स्वाहा ॥ २४ ॥

वाजस्य नु प्रसव आबभूवेमा च विश्वा भुवनानि सर्वतः ।
सनेमि राजा परियाति विद्वान् प्रजां पुष्टिं वर्धयमानोऽअस्मे स्वाहा ॥ २५ ॥

सोमᳪ राजानमवसेऽग्निमन्वारभामहे ।
आदित्यान्विष्णुᳪ सूर्यं ब्रह्माणं च बृहस्पतिᳪ स्वाहा ॥ २६ ॥

अर्य॒मणं॒ बृह॒स्पति॒मिन्द्रं॒ दाना॑य चोदय ।
वाचं॒ विष्णु॑ᳬ सर॑स्वतीᳬ सवि॒तारं॑ च वा॒जिन॑ᳬ स्वाहा॑ ॥ २७ ॥

अग्ने॒ऽअच्छा॑वदे॒ह न॒ः प्रति॑ नः सु॒मना॑ भव ।
प्र नो॑ यच्छ सहस्रजि॒त्त्वᳬ हि ध॑न॒दाऽअसि॒ स्वाहा॑ ॥ २८ ॥

प्र नो॑ यच्छत्वर्य॒मा प्र पू॒षा प्र बृह॒स्पति॑ः । प्र वा॒ग्दे॒वी द॑दा॒तु न॒ः स्वाहा॑ ॥ २९ ॥

दे॒वस्य॑ त्वा सवि॒तुः प्र॑स॒वेऽश्विनो॑र्बा॒हुभ्यां॑ पू॒ष्णो हस्ता॑भ्याम् ।
सर॑स्वत्यै वा॒चो य॒न्तुर्य॒न्त्रियै॑ दधामि॒ बृह॒स्पते॑ष्ट्वा साम्रा॑ज्येना॒भिषि॑ञ्चाम्यसौ ॥३०॥

अ॒ग्निरेका॑क्षरेण प्रा॒णमुद॑जयत् तमु॒ज्जे॑षम॒श्विनौ॒ द्व्य॑क्षरेण द्वि॒पदो॑ मनु॒ष्या॒नुद॑जयतां॒ तानु॒ज्जे॑षं विष्णु॒स्त्र्य॑क्षरेण त्रीँल्लो॒कानु॒द॑जय॒त्तानु॒ज्जे॑षᳬ सोम॒श्चतु॑रक्षरेण॒ चतु॑ष्पदः प॒शूनु॒द॑जय॒त्तानु॒ज्जे॑षम् ॥ ३१ ॥

पू॒षा पञ्चा॑क्षरेण॒ पञ्च॒ दिश॒ऽउद॑जय॒त्ताऽउज्जे॑षᳬ सवि॒ता षड॑क्षरेण॒ षडृ॒तूनु॒द॑जय॒त्तानु॒ज्जे॑षं म॒रुतः॑ स॒प्ताक्ष॑रेण स॒प्त ग्रा॒म्यान् प॒शूनु॒द॑जयँ॒स्तानु॒ज्जे॑षं॒ बृह॒स्पति॑र॒ष्टाक्ष॑रेण गाय॒त्रीमु॒द॑जय॒त्तामु॒ज्जे॑षम् ॥ ३२ ॥

मि॒त्रो नवा॑क्षरेण त्रि॒वृत॑ᳬ स्तोम॒मुद॑जयत् तमु॒ज्जे॑षं॒ वरु॑णो॒ दशा॑क्षरेण वि॒राज॒मुद॑जय॒त्तामु॒ज्जे॑ष॒मिन्द्र॒ऽएका॑दशाक्षरेण त्रि॒ष्टुभ॒मुद॑जय॒त्तामु॒ज्जे॑षं॒ विश्वे॑ दे॒वा द्वाद॑शाक्षरेण॒ जग॑तीमु॒द॑जयँ॒स्तामु॒ज्जे॑षम् ॥ ३३ ॥

वस॑व॒स्त्रयो॑दशाक्षरेण त्रयोद॒शᳬ स्तोम॒मुद॑जयँ॒स्तमु॒ज्जे॑पᳬ रु॒द्राश्चतु॑र्दशाक्षरेण चतु॒र्द॒शᳬ स्तोम॒मुद॑जयँ॒स्तमु॒ज्जे॑षमादि॒त्याः पञ्च॑दशाक्षरेण पञ्चद॒शᳬ स्तोम॒मुद॑जयँ॒स्तमु॒ज्जे॑प॒मदि॑तिः॒ षोड॑शाक्षरेण षोड॒शᳬ स्तोम॒मुद॑जय॒त्तमु॒ज्जे॑षं प्र॒जाप॑तिः स॒प्तद॑शाक्षरेण सप्तद॒शᳬ स्तोम॒मुद॑जय॒त्तमु॒ज्जे॑षम् ॥ ३४ ॥

ए॒ष ते॑ निर्ऋते भा॒गस्तं जु॑षस्व॒ स्वाहा॒ऽग्निने॑त्रेभ्यो दे॒वेभ्य॑ः पु॒रःसद्भ्य॒ः स्वाहा॑ य॒मने॑त्रेभ्यो दे॒वेभ्यो॑ दक्षि॒णा॒सद्भ्य॒ः स्वाहा॑ वि॒श्वदे॑वनेत्रेभ्यो दे॒वेभ्य॑ः पश्चा॒त्सद्भ्य॒ः स्वाहा॑ मि॒त्रावरु॑णनेत्रेभ्यो वा म॒रुन्ने॑त्रेभ्यो वा दे॒वेभ्य॑ऽउत्तरा॒सद्भ्य॒ः स्वाहा॒ सोम॑नेत्रेभ्यो दे॒वेभ्य॑ऽउपरि॒सद्भ्यो॒ दुव॑स्वद्भ्य॒ः स्वाहा॑ ॥ ३५ ॥

ये देवा ऽअग्निनेत्राः पुरःसदस्तेभ्यः स्वाहा ये देवा यमनेत्रा दक्षिणासदस्तेभ्यः स्वाहा ये देवा विश्वदेवनेत्राः पश्चात्सदस्तेभ्यः स्वाहा ये देवा मित्रावरुणनेत्रा वा मरुन्नेत्रा वोत्तरासदस्तेभ्यः स्वाहा ये देवाः सोमनेत्रा ऽउपरिसदो दुवस्वन्तस्तेभ्यः स्वाहा ॥ ३६ ॥

अग्ने सहस्व पृतना ऽअभिमातीरपास्य । दुष्टरस्तरन्नरातीर्वर्चो धा यज्ञवाहसि ॥३७॥

देवस्य त्वा सवितुः प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् । उपाᳬंशोर्वीर्येण जुहोमि हतᳬं रक्षः स्वाहा रक्षसां त्वा वधायावधिष्म रक्षोऽवधिष्मामुमसौ हतः ॥३८ ॥

सविता त्वा सवानाᳬं सुवतामग्निर्गृहपतीनाᳬं सोमो वनस्पतीनाम् ।
बृहस्पतिर्वाच ऽइन्द्रो ज्यैष्ठ्याय रुद्रः पशुभ्यो मित्रः सत्यो वरुणो धर्मपतीनाम् ॥३९॥

इमं देवाऽअसपत्नᳬं सुवध्वं महते क्षत्राय महते ज्यैष्ठ्याय महते जानराज्यायेन्द्रस्ये-न्द्रियाय । इममुष्य पुत्रममुष्यै पुत्रमस्यै विश ऽ एष वोऽमी राजा सोमो ऽस्माकं ब्राह्मणानाᳬं राजा ॥ ४० ॥

इति नवमोऽध्यायः ।

अथ दशमोऽध्यायः ।

अपो देवा मधुमतीरगृभ्णन्नूर्जस्वती राजस्वश्चितानाः ।
याभिर्मित्रावरुणावभ्यषिञ्चन्याभिरिन्द्रमनयन्नत्यरातीः ॥ १ ॥

वृष्ण ऽऊर्मिरसि राष्ट्रदा राष्ट्रं मे देहि स्वाहा वृष्ण ऽऊर्मिरसि राष्ट्रदा राष्ट्र-ममुष्मै देहि वृषसेनो ऽसि राष्ट्रदा राष्ट्रं मे देहि स्वाहा वृषसेनोऽसि राष्ट्रदा राष्ट्रममुष्मै देहि ॥ २ ॥

अर्थेत स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहार्थेत स्थ राष्ट्रदा राष्ट्रममुष्मै दत्तौजस्वती स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहौजस्वती स्थ राष्ट्रदा राष्ट्रममुष्मै दत्तापः परिवाहिणी स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहापः परिवाहिणी स्थ राष्ट्रदा राष्ट्रममुष्मै दत्तापां पतिरसि राष्ट्रदा राष्ट्रं मे देहि स्वाहापां पतिरसि राष्ट्रदा राष्ट्रममुष्मै देह्यपां गर्भोऽसि राष्ट्रदा राष्ट्रं मे देहि स्वाहापां गर्भोऽसि राष्ट्रदा राष्ट्रममुष्मै देहि ॥ ३ ॥

सूर्यत्वचस स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा सूर्यत्वचस स्थ राष्ट्रदा राष्ट्रममुष्मै दत्त सूर्यवर्चस स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा सूर्यवर्चस स्थ राष्ट्रदा राष्ट्रममुष्मै दत्त मान्दा स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा मान्दा स्थ राष्ट्रदा राष्ट्रममुष्मै दत्त व्रजक्षित स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा व्रजक्षित स्थ राष्ट्रदा राष्ट्रममुष्मै दत्त वाशा स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा वाशा स्थ राष्ट्रदा राष्ट्रममुष्मै दत्त शविष्ठा स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा शविष्ठा स्थ राष्ट्रदा राष्ट्रममुष्मै दत्त शक्वरी स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा शक्वरी स्थ राष्ट्रदा राष्ट्रममुष्मै दत्त जनभृत स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा जनभृत स्थ राष्ट्रदा राष्ट्रममुष्मै दत्त विश्वभृत स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा विश्वभृत स्थ राष्ट्रदा राष्ट्रममुष्मै दत्तापः स्वराज स्थ राष्ट्रदा राष्ट्रममुष्मै दत्त । मधुमतीर्मधुमतीभिः पृच्यन्तां महि क्षत्रं क्षत्रियाय वन्वाना ऽ अनाधृष्टाः सीदत सहौजसो महि क्षत्रं क्षत्रियाय दधतीः ॥ ४ ॥

सोमस्य त्विषिरसि तवेव मे त्विषिर्भूयात् । अग्नये स्वाहा सोमाय स्वाहा सवित्रे स्वाहा सरस्वत्यै स्वाहा पूष्णे स्वाहा बृहस्पतये स्वाहेन्द्राय स्वाहा घोषाय स्वाहा श्लोकाय स्वाहाꣳशाय स्वाहा भगाय स्वाहार्यम्णे स्वाहा ॥ ५ ॥

पवित्रे स्थो वैष्णव्यौ सवितुर्वः प्रसव ऽ उत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः। अनिभृष्टमसि वाचो बन्धुस्तपोजाः सोमस्य दात्रमसि स्वाहा राजस्वः ॥ ६ ॥

सधमादो द्युम्निनीराप ऽ एता ऽ अनाधृष्टा ऽ अपस्यो वसानाः ।
पस्त्यासु चक्रे वरुणः सधस्थमपाꣳ शिशुर्मातृतमास्वन्तः ॥ ७ ॥

क्षत्रस्योल्बमसि क्षत्रस्य जराय्वसि क्षत्रस्य योनिरसि क्षत्रस्य नाभिरसीन्द्रस्य वार्त्रघ्नमसि मित्रस्यासि वरुणस्यासि त्वयायं वृत्रं वधेत् । दृवासि रुजासि क्षुमासि । पातैनं प्राञ्चं पातैनं प्रत्यञ्चं पातैनं तिर्यञ्चं दिग्भ्यः पात ॥ ८ ॥

आविर्मर्या ऽ आवित्तो ऽ अग्निर्गृहपतिरावित्त ऽ इन्द्रो वृद्धश्रवा ऽ आवित्तौ मित्रावरुणौ धृतव्रतावावित्तः पूषा विश्ववेदा ऽ आवित्ते द्यावापृथिवी विश्वशम्भुवावावित्तादितिरुरुशर्मा ॥९ ॥

अवेष्टा दन्दशूकाः प्राचीमारोह गायत्री त्वावतु रथन्तरꣳ साम त्रिवृत्स्तोमो वसन्त ऽ ऋतुर्ब्रह्म द्रविणम् ॥ १० ॥

दक्षिणामारोह त्रिष्टुप् त्वावतु बृहत्साम पञ्चदश स्तोमो ग्रीष्म ऽ ऋतुः क्षत्रं द्रविणम्॥ ११॥

प्रतीचीमारोह जगती त्वावतु वैरूपꣳ साम सप्तदश स्तोमो वर्षा ऽ ऋतुर्विड् द्रविणम्॥१२

उदीचीमारोहानुष्टुप् त्वावतु वैराजꣳ सामैकविꣳश स्तोमः शरदृतुः फलं द्रविणम्॥१३

ऊर्ध्वामारोह पङ्क्तिस्त्वावतु शाक्वररैवते सामनी त्रिणवत्रयस्त्रिꣳशौ स्तोमौ हेमन्तशिशिरावृतू वर्चो द्रविणं प्रत्यस्तं नमुचेः शिरः॥ १४॥

सोमस्य त्विषिरसि तवेव मे त्विषिर्भूयात्। मृत्योः पाह्योजोऽसि सहोऽस्यमृतमसि॥१५॥

हिरण्यरूपा ऽ उषसो विरोक ऽ उभाविन्द्रा ऽ उदिथः सूर्यश्च ।
आरोहतं वरुण मित्र गर्त्तं ततश्चक्षाथामदितिं दितिं च मित्रोऽसि वरुणोऽसि॥१६॥

सोमस्य त्वा द्युम्नेनाभिषिञ्चाम्यग्नेर्भ्राजसा सूर्यस्य वर्चसेन्द्रस्येन्द्रियेण ।
क्षत्राणां क्षत्रपतिरेध्यति दिद्यून् पाहि ॥ १७ ॥

इमं देवा ऽ असपत्नꣳ सुवध्वं महते क्षत्राय महते ज्यैष्ठ्याय महते जानराज्यायेन्द्रस्येन्द्रियाय । इममुष्य पुत्रममुष्यै पुत्रमस्यै विश ऽ एष वोऽमी राजा सोमोऽस्माकं ब्राह्मणानाꣳ राजा ॥ १८ ॥

प्र पर्वतस्य वृषभस्य पृष्ठान्नावश्चरन्ति स्वसिच ऽ इयानाः ।
ता ऽ आववृत्रन्नधरागुदक्ता ऽ अहिं बुध्न्यमनु रीयमाणाः ।
विष्णोर्विक्रमणमसि विष्णोर्विक्रान्तमसि विष्णोः क्रान्तमसि ॥ १९ ॥

प्रजापते न त्वदेतान्यन्यो विश्वा रूपाणि परि ता बभूव ।
यत्कामास्ते जुहुमस्तन्नोऽअस्त्वयममुष्य पितासावस्य पिता वयꣳ स्याम पतयो रयीणाꣳ स्वाहा । रुद्र यत्ते क्रिवि परं नाम तस्मिन्हुतमस्यमेष्टमसि स्वाहा ॥२०॥

इन्द्रस्य वज्रोऽसि मित्रावरुणयोस्त्वा प्रशास्त्रोः प्रशिषा युनज्मि। अव्यथायै त्वा स्वधायै त्वारिष्टो ऽ अर्जुनो मरुतां प्रसवेन जयापाम मनसा समिन्द्रियेण ॥ २१ ॥

मा त ऽ इन्द्र ते वयं तुराषाडयुक्तासो ऽ अब्रह्मता विदसाम ।
तिष्ठा रथमधि यं वज्रहस्ता रश्मीन्देव यमसे स्वश्वान् ॥ २२ ॥